शाङ्गधर संहिता.

medicine

~~१९५~~

9/7

वैद्यक पोथी

PS TF

32

Vaidyak pothi

33

16

...त्रेयप्रसंन्न श्रियं स दद्यां भवतां पुरारिर्यदंगतेजःप्रसरे भवानी॥
...दिकायां महौषधी विज्वलिता हिमाद्रौ १ प्रसिद्धयोगा मुनिभिः प्रयु
...र्ये बहुशोनुभूताः॥ विधायते शार्ङ्गधरेण तेषां सुसंग्रहः सज्जनरंजना
...ाकृतिसात्म्यजातिभेदैः समीक्ष्याकुर सर्वरोगान्॥ चिकित्सकं चेहणक
...वै शैर्विधिवत्सुयोगैः २ दिव्यौषधीनां बहवः प्रभेदाः वृंदारकाणा
मिव विस्फुरंति॥ ज्ञात्वेति संदेहमुपास्य धीरैः संभावनीया विविधप्रभावाः ४ स्वाभाविका
गंतुककायिकान्तःसां रोगा भवेयुः कलिकर्मदोषजाः॥ तच्छेदनार्थं दुरितापहारिणः श्रेयो
मयान्योगवरान्नियोजयेत् ५ प्रयोगानागमासिद्धान्प्रत्यक्षानुमानतः॥ सर्वलोकहि
तार्थाय वक्ष्याम्यनतिविस्तरात् ६ अथानुक्रमणिका॥ ॥ प्रथमं परिभाषास्याद्भेष

ज्यकथनं ततः॥ नाडीपरीक्षादिविधिस्ततो दीपनपाचनं ७ ततः कलादिकाख्यानमाहारादि
गतिस्तथा॥ रोगाणां गणनाचैव पूर्वखंडोयमीरितः ८ स्वरसः क्वाथफांटौ च हिमः कल्कश्च
चूर्णकं॥ तथैव गुटिकालेहौ स्नेहसाधनमेव च ९ धातुशुद्धिरसाश्चैव खंडोयं मध्यमः स्मृ
तः॥ स्नेहपानं स्वेदविधिर्वमनं च विरेचनं १० ततस्तु स्नेहवस्तिस्यात्ततश्चापि निरूहणं॥ त
तश्चाप्युत्तरो वस्तिस्ततो नस्यविधिर्मतः ११ धूमपानविधिश्चैव गंडूषादिविधिस्तथा॥ ले
पादीनां विधिः स्यात्तथा शोणितविस्रुतिः १२ नेत्रकर्मप्रकारस्तु खंडः स्यादुत्तरस्त्वयं॥
द्वात्रिंशत्संमिताध्यायैः युक्तेयं संहिता स्मृता १३ षड्विंशतिशतान्यत्र श्लोकानां गणितानि च॥ १४॥
...थ परिभाषा न मानेन विना युक्तिर्द्रव्याणां जायते क्वचित्॥ अतः प्रयोगकार्यार्थं मानम
...या १५ त्रसरेणुर्बुधैः प्रोक्तो त्रिंशता परमाणुभिः॥ त्रसरेणुस्तु पर्यायनाम्ना वंशी
...गद्यते १६ जालांतरगतैः सूर्यकरैर्वंशी विलोक्यते॥ षड्वंशीभिर्मरीचिः स्यात्ताभिः षड्भिश्च
राजिका १७ तिसृभिः राजिकाभिस्तु सर्षपः प्रोच्यते बुधैः॥ यवोष्टसर्षपैः प्रोक्तो गुंजा स्या

२
सञ्चतुष्टयं १८ षड्भिस्तु रक्तिकाभिस्यान्माषको हेमधान्यकं ॥ माषैश्चतुर्भिः शाणःस्या
द्धरणः सन्निगद्यते १९ टंकसएव कथितः तद्द्वयं कोलउच्यते ॥ क्षुद्रभो वटकश्चैव द्रंक्षणः
सन्निगद्यते २० कोलद्वयंच कर्षस्यात्सःप्रोक्तः पाणिमानिका ॥ अक्षं पिचुः पाणितलं किं
चित्पाणिश्चतिंदुकं २१ बिडालपदकं चैव तथाषोडशिकामता ॥ करमध्ये हंसपदं सुवर्णकव
लग्रहं २२ उदुंबरं च पर्याये कर्षएव निगद्यते ॥ स्यात्कर्षाभ्यामर्धपलं शुक्तिरष्टमिका तथा २३
शुक्तिभ्यां च पलं ज्ञेयं मुष्टिराम्रं चतुर्थिका ॥ प्रकुंचषोडशी बिल्वं पलमेवात्र कीर्त्यते २४ प
लाभ्यां प्रसृतिर्ज्ञेया प्रसृतिश्च निगद्यते ॥ प्रसृतिभ्यामंजलिस्यात्कुडवोर्धशरावकः २५ श
रावाभ्यां भवेत्प्रस्थश्चतुःप्रस्थैस्तथाढकं ॥ भाजनं पात्रकांस्ये पात्रेच चतुःषष्टिपलश्चसः २६
चतुर्भिराढकैर्द्रोणः कलशो नल्वणोर्मणः ॥ उन्मानश्च घटोराशिर्द्रोणपर्यायसंज्ञितः २७
द्रोणाभ्यां शूर्पकुंभौ च चतुःषष्टिशरावकः ॥ शूर्पाभ्यां च भवेद्द्रोणी वाहोद्रोणीचसास्मृता
२
२८ द्रोणीचतुष्टयं खारी कथिता सूक्ष्मबुद्धिभिः ॥ चतुःसहस्रपलिका षण्णवत्यधिका

वसा २९ पलानां द्विसहस्रं च भारएकः प्रकीर्त्तितः॥ तुला पलशतं ज्ञेयं सर्वत्रैवैषनि
र्णयः ३० माषटंकाक्षबिल्वानि कुडवः प्रस्थमाढकं॥ राशिद्रोणी खारिकेति यथोत्तरचतु
र्गुणाः ३१ गुंजादिमानमारभ्य यावत्स्यात् कुडवस्थितिः॥ द्रवार्द्रशुष्कद्रव्याणां तावन्मा
नं समं मतं ३२ प्रस्थादिमानमारभ्य द्विगुणं तद्द्रवार्द्रयोः॥ मानं तथा तुलायास्तु द्विगु
णं न क्वचित्स्मृतं ३३ मृद्वृक्षवेणुलोहादेर्भांडं यच्चतुरंगुलं॥ विस्तीर्णं च तथोच्चं च त
न्मानं कुडवं वदेत् ३४ यदौषधं तु प्रथमं यस्य योगस्य कथ्यते॥ तन्नाम्नैव स योगो हि क
थ्यते च हि निश्चयः ३५ इति मागधिपरिभाषा॥ ॥ स्थितिर्नास्त्येव मात्रायाः काल
मग्निवयोबलं प्रकृतिं दोषदेशौ च दृष्ट्वा मात्रां प्रकल्पयेत् ३६ यतो मंदाग्नयो ह्रस्वा
हीनसत्वनराः कलौ॥ अतस्तु मात्रा तेषां हि प्रोच्यते सुश्रुतसंमता ३७ यवो द्वादशभि
र्गौरसर्षपैः प्रोच्यते बुधैः॥ यवद्वयेन गुंजा स्यात् त्रिगुंजो वल्ल उच्यते ३८ माषो गुंजा
भिरष्टाभिः सप्तभिर्वा भवेत्क्वचित्॥ स्याच्चतुर्माषकैः शाणः स निष्कष्टंक एव च ३९

शाणो माषकैः षड्भिः कर्षः ...माषिकः ॥ चतुःकर्षैः पलं प्रोक्तं दशशाणमितं बुधैः ४०
२ चतुःपलैश्च कुडवं प्रस्थाद्याः पूर्ववन्मताः ॥ कलिंगं मागधं चेति द्विविधं मानमुच्यते ४१
कलिंगान्मागधं श्रेष्ठं मानं मानविदो विदुः ॥ ॥इति कलिंगपरिभाषा॥ ॥यथान्येवहि
योग्यानि द्रव्याण्यखिलकर्मसु ॥ विना विडंगकृष्णाभ्यां गुडधान्याज्यमाक्षिकैः ४२ गुडू
ची कुटजो वासा कूष्मांडं च शतावरी ॥ अश्वगंधा सहचरी शतपुष्पा प्रसारणी ४३ प्रयो
क्तव्याः सदैवार्द्रा द्विगुणा नैव कारयेत् ॥ शुष्कं नवीनं यद्द्रव्यं योज्यं सकलकर्मसु ४४
आर्द्रं च द्विगुणं युंज्यादेष सर्वत्र निश्चयः ॥ ४५ ॥ कालेऽनुक्ते प्रभातं स्यादंगेऽनुक्ते ज
टा भवेत् ॥ भागेऽनुक्ते च साम्यं स्यात्पात्रेऽनुक्ते च मृन्मयं ४६ एकमप्यौषधं योगे यस्मिन्य
त्पुनरुच्यते ॥ मानतो द्विगुणं प्रोक्तं तद्द्रव्यं तत्त्वदर्शिभिः ४७ चूर्णस्नेहासवालेहाः प्रा
यशो मंडलान्विताः ॥ कषायलेपयोः प्रायो युज्यते रक्तचंदनं ४८ गुणहीना भवेद्वर्षा २
दूर्ध्वं तद्रूपमौषधी ॥ मासद्वयात्तथा चूर्णं हीनवीर्यत्वमाप्नुयात् ४९ हीनत्वं गुटिकाले
हौ लभेते वत्सरात्परं ॥ हीनाः स्युर्घृततैलाद्याश्चतुर्मासाधिकात्तथा ५० औषध्यो

॥ ॥इत्यौषध ह[illegible]॥ ॥[illegible]॥ ॥भैषज्यमभ्यवहरेत्प्रभाते प्रायशो बुधैः॥ का
४ षायांश्च विशेषेण तत्र भेदस्तु दर्शितः ६१ ज्ञेयः पंचविधिः कालो भैषज्यग्रहणे
नृणां॥ किंचित्सूर्योदये जाते तथा दिवसभोजने ६२ सायंतने भोजने च मुहुश्चा
पि तथा निशि॥ प्रायः पित्तकफोद्रेके विरेकवमनार्थयोः ६३ लेखनार्थे च भैषज्यं
प्रभातेन्नं समाहरेत्॥ एवं स्यात्प्रथमः कालो भैषज्यग्रहणे नृणां ६७ ॥ ॥इति प्र
थमः कालः॥ ॥भैषज्यं विगुणोपाने भोजनाग्रे प्रशस्यते॥ अरुचौ चित्रभोज्येश्च
मिश्रं रुचिरमाहरेत् ६८ समानवाते विगुणे मंदेग्नावग्निदीपने॥ दद्याद्भोजनम
ध्ये च भैषज्यं कुशलो भिषक् ६९ व्यानकोपे च भैषज्यं भोजनांते समाहरेत्॥ हिक्का
क्षेपककंपेषु पूर्वमंते च भोजनात् ७० एवं द्वितीयः कालश्च प्रोक्तो भैषज्यकर्मणि॥
॥ ॥इती द्वितीयः कालः॥ ॥उदाने कुपिते वाते स्वरभंगादिकारिणि॥ ग्रासे ग्रासांत ४
रे देयं भैषज्यं साध्यभोजने ७१ प्राणे प्रदुष्टे साध्यस्य तु क्तस्यांतेन दीयते॥ औष

धं प्रायशो धीरैः कालोयं स्यात्तृतीयकः ७२ ॥ ॥इति तृतीयः कालः॥ ॥मुहुर्मुहुश्च तृ
ट्छर्दि हिक्काश्वासगरेषु च॥ सान्नं च भैषजं दद्यादिति कालश्चतुर्थकः ७३ ऊर्ध्वजत्रुवि
कारेषु २५ लेखने बृंहणे तथा॥ पाचनं शमनं देयमनन्नं भेषजं निशि: ७४ इति पंचम
कालस्याप्रोक्तो भैषज्यहेतवे॥ औषधशेषे भुक्तेपी तं तथौषधं च शोधन्ने ७५ चनकरोति
गदोपशमं प्रकोपयत्यन्यरोगांश्च॥ ॥इति अध्याय॥ ॥इति पंचमकालः॥ ॥द्रव्ये रसो गु
णो वीर्यं विपाकः शक्तिरेव च॥ सबंधेन क्रमादेताः पंचावस्थाः प्रकीर्तिताः ७६ मधुरो
म्लपटुश्चैव कटुतिक्तकषायकः॥ इत्येते षड्रसाः स्युस्ताना:माद्रव्यसमाश्रिताः ७७
धरांबुश्मानलजलं वलनाकाशमारुतैः॥ वाय्वग्निनिलैभूतैर्द्रव्यैरसभवः क्रमात् ७८
धरांबुवह्निपवनयोगं प्रायो गुणाः स्मृताः॥ गुर्वादिश्चलमंदं च व्यन्येतु षोडश गुणसंचय ७९
इति गुणाः॥ ॥वीर्यमुष्णं तथा शीतं प्रायशो द्व्यसंश्रये॥ वत्सनाभविषो मोहं दृश्यते
भुवनत्रये ८० अन्येवाल्पर्षिभिः प्रोक्तं तिवीर्याण्यन्यानि-थान्यपि॥ ॥इति वीर्यं॥ ॥म

रुः पटुश्च मधुरो मात्स्योम्लं पच्यते रसः ॥ कषायकटुतिक्तानां पाकः स्यात्प्रायशः क
५ टुः ८१ मधुराज्जायते श्लेष्मा पित्तमम्लात्सजायते ॥ कटुकाज्जायते वायुः कर्माण्येता
नि पाकतः ८२ ॥ ॥इति विपाकः॥ ॥प्रभावस्तु पथ्याधात्रीलकुचस्वरसादिभिः॥ स
मापि कुरुते दोषत्रितयस्य विनाशनी ८३ ... केवलं इयं कर्म कुर्यात्प्रभावतः॥ ज्व
रं हंति शिरोबद्धा सहदेवीजटा यथा ८४ ॥ ॥इति प्रभावः॥ ॥क्वचिद्रसो गुणो वीर्यं
विपाकः शक्तिरेव च ॥ कर्म स्वं स्वं प्रकुर्वंति तत्तद्द्रव्यमाश्रितास्थिता ८५ ॥ ॥इति द्रव्य
रसगुणवीर्य॥ ॥विपाकप्रभावः॥ ॥चयकोपसमायस्मिन् दोषाणां संभवंति हि॥
ऋतुषट्कं तथाख्यातं रवेराशिषु संक्रमात् ८६ ... हेमंते संचितः कुप्यति
... ॥ ग्रीष्मे संचीयते वायुः प्राविट्काले प्रकुप्यति ८७ वर्षासु चीयते पित्तं
शरत्काले प्रकुप्यति ॥ हेमंते चीयते श्लेष्मा वसंते च प्रकुप्यति ८८ प्रायेण प्रशमं या ५
ति स्वयमेव समीरणः॥ शरत्काले वसंते च पित्तं प्रावृड्ऋतौ कफः ८९ आश्विन

...स्य ... वत्सरात्परं॥ पुराणास्ते गुणैर्युक्ता आसवा धातवो रसाः ५१ व्या
धेरयुक्तं यद्द्रव्यं गणोक्तमपि तत्त्यजेत्॥ अनुक्तमपि युक्तं यत्तद्योज्यं तत्र तद्बुधैः ५२
॥ ॥इति युक्तायुक्तविचारः॥ ॥आग्नेया विंध्यशैलाद्याः सौम्यो हिमगिरिर्मतः॥ अतस्त
दौषधानि स्युरनुरूपाणि हेतुभिः ५३ अन्येष्वपि प्ररोहंति वनेषूपवनेषु च॥ गृह्णीयात्ता
नि सुमनाः शुचिः प्रातः सुवासरे ५४ आदित्यसंमुखो मौनी नमस्कृत्य शिवं हृदि॥ साधा
रणधराद्द्रव्यं गृह्णीयादुत्तराश्रितं ५५ वल्मीककुत्सितानूपश्मशानोषरमार्गजाः॥
जंतुवह्निहिमव्याप्ता नौषध्यः कार्यसाधकाः ५६ सर्वलक्षणसंपन्ना भूमिः साधारणा
स्मृता ॥ द्रव्याणि यत्र तत्रैव तद्गुणानि विशेषतः ५७ शरद्यखिलकार्यार्थं ग्राह्यं स
रसमौषधं॥ विरेकवमनार्थं च वसंतांते समाहरेत् ५८ अतिस्थूलजटा यास्तासां
ग्राह्यास्त्वचो बुधैः॥ गृह्णीयात्सूक्ष्ममूलानि सकलान्यपि बुद्धिमान् ५९ न्यग्रोधा
देस्त्वचो ग्राह्या ... सारं ... दिकं॥ तालीसादेश्च पत्राणि फलं स्यात्त्रिफलादितः ६०

६ सप्तधातवः सप्तमलाः ॥ सप्तोपधातवः सप्तत्वचः सप्त प्रकीर्त्तिताः १८ त्रयो दो
षा नवशतं स्नायूनां संधयस्तथा ॥ दशाधिकं च द्विशतं अस्थ्नां च द्विशतं मतं १९
सप्तोत्तरं मर्मशतं शिरा सप्तशतं तथा ॥ चतुर्विंशतिराख्याता धमन्यो रसवाहिकाः १००
मांसपेश्यः समाख्याता नृणां पंचशतं बुधैः ॥ स्त्रीणां च विंशत्यधिकाः कंडराश्चैव
षोडशः १ नदेहे दशरंध्राणि नारीदेहे त्रयोदश ॥ एतत्तु समासतः प्रोक्ता हि ‥रेणा
धुनोच्यते २ मांसासृक्मेदसां तिस्रो यकृत्प्लीह्नोश्च तुर्थिका ॥ पंचमी च तथान्त्राणां
षष्ठी चाग्निधरा मता ३ ऊर्ध्वमग्न्याशयो नाभेर्वामभागे व्यवस्थितः ॥ तस्योपरि जलं
ज्ञेयं तदधः पवनाशयः ४ मलाशयस्त्वधः स्तस्य वस्तौ मूत्राशयः स्मृतः ॥ जीवरक्ता
शयमुरो ज्ञेयाः सप्ताशयास्त्वमी ५ पुरुषेभ्योधिकाश्चान्ये नारीणामाशयास्त्रयः ॥ ६
धरा गर्भाशयः प्रोक्तः स्तनौ स्तन्याशयो मतौ ६ रसासृक् मांसमेदोस्थिमज्जाश्च

शुक्राणि धातवः ॥ जायंते न्योन्यतः सर्वे पाचिता पित्ततेजसा ७ जिह्वानेत्रकपोलानां जलं पि
त्तं च रंजकं ॥ कर्णविट् रसना दंतकक्षामेढ्रादिजं मलं ८ नखनेत्रमलं वक्त्रे स्निग्धत्वं पि
टकास्तथा ॥ जायते सप्तधातूनां मलान्येवमनुक्रमात् ९ स्तन्यं रजश्च नारीणां काले भ
वति गच्छति ॥ शुद्धमांसभवः स्नेहो ‥सः संकीर्त्यते वसा ॥ १० ॥ स्वेदो दंताः स्तथा केशास्तथै
वौजश्च सप्तमं ॥ ओजः सर्वशरीरस्थं स्निग्धं शीतं स्थिरं सितं ११ सोमात्मकं शरीरस्य
बलपुष्टिकरं मतं ॥ इति धातुभवा ज्ञेयाः एता सप्तोपधातवः १२ ज्ञेयावभासिनी पूर्वा
सिध्मास्थानं च सा मता ॥ द्वितीया लोहिता ज्ञेया तिलकालकजन्मभूः १३ श्वेता तृतीया सं
ख्याता स्थानं चर्मदलस्य सा ॥ ताम्रा चतुर्थी विज्ञेया किलासश्वित्रभूमिका १४ पंचमी वेदना
ख्याता सर्वकुष्ठोद्भवस्ततः ॥ विख्याता लोहिता षष्ठी ग्रंथिगंडापचास्थिता १५ स्थूलात्व
क् सप्तमी ख्याता विद्ध्यादेः स्थितिश्च सा ॥ इति सप्तत्वचः प्रोक्ताः स्थूला व्रीहि द्विमात्रका १६

वायुः पित्तं कफो दोषा धातवश्च मलास्तथा॥ तत्रापि पंचधाख्याताः प्रत्येकं देहधारणात् १७
७ पित्तं पंगुः कफः पंगुः पंगवो धातवो मलाः॥ वायुना यत्र नीयंते तत्र गच्छंति मेघवत् १८ पव
नस्तेषु बलवान् विभागकरत्वतः॥ रजोगुणमयः सूक्ष्मः शीतो रूक्षो लघुश्चलः १९
मलाशये चरेत्कोष्ठे वह्निस्थाने तथा हृदि॥ कंठे सर्वांगदेशेषु वायुः पंचप्रकारतः २० अ
पानश्च समानश्च प्राणोदानौ तथैव च॥ व्यानश्चेति समीरस्य नामान्युक्तान्यनुक्रमात् २१
पित्तमुष्णं द्रवं पीतं नीलं सत्वगुणोत्तरं॥ कटु तिक्तरसं ज्ञेयं विदग्धं चाम्लतां व्रजेत् २२
अग्न्याशये भवेत्पित्तं अग्निरूपं तिलोन्मितं॥ त्वचि कांतिकरं ज्ञेयं लेपाभ्यंगादिपावकं २३
हृत्स्थं यकृत्प्लीह्नोः पित्तं तद्रसं शोणितां नयेत्॥ यत्पित्तं नेत्रयुग्मे रूपदर्शनकारितत् २४ ७
यत्पित्तं हृदये तिष्ठेत् मेधाप्रज्ञाकरं च तत्॥ पाचकं भ्राजकं चैव रंजकालोचकस्तथा २५
साधकं चेति पंचैव पित्तनामान्यनुक्रमात्॥ कफः स्निग्धो गुरुः श्वेतः पिच्छलः शीतलस्तथा २६

स्य दिनान्यष्टौ सर्वे कार्त्तिकवासराः॥ यमदंष्ट्रा समाख्याता अल्पाहारी भवेत्ततः॥ ९०॥
स्वयं कोपशमं दोषा विहाराहारसेवनैः॥ समानैर्यांति कालेपि विपरीतैर्विपर्ययं ९१ लघु
रूक्षमिताहारादतिशीतश्रमात्तथा॥ प्रदोषे कामशोकाभ्यां भीतिचिंतातिजागरैः ९२
अभिघातादयोगाहाज्जीर्णेन्ने धातुसंक्षयात्॥ वायुः प्रकोपं यात्येभिः प्रत्यनीकैश्च
शाम्यति ९३ विदाहि कटुम्लोष्णभोज्यैरत्युष्णसेवनात्॥ मध्याह्ने क्षुत्तृषारोधात्
जीर्यत्यन्नेर्धरात्रके ९४ पित्तं प्रकोपं यात्येभिः प्रत्यनीकैश्च शाम्यति॥ मधुरस्निग्धशी
तादिभोज्यैर्दिवसनिद्रया ९५ मंदाग्नौ च प्रभाते च भुक्तमात्रे तथाश्रमात्॥ श्लेष्मा प्रको
पं यात्येभिः प्रत्यनीकैश्च शाम्यति ९६॥ ॥इति दोषस्य प्रकोपोपशमकालः॥ ॥इति
दामोदरसूनुशार्ङ्गधरेण विरचितायां संहितायां प्रथमस्थाने भैषज्यकालोक्तिद्रव्यरस
गुणवीर्यविपाकप्रभावादिकथनं नाम प्रथमोध्यायः॥ १॥ ॥कालः सप्तशयाः

स्य संश्रयं ३७ जलवाहिशिरामूलं तच्छादनकं तिलं ॥ हृक्लोपुष्टिकरो ज्ञेयो क्लोजठरस्थ
८ स्य मेधसः ३८ बीजवाहिशिराधारौ वृषणौ पौरुषावहौ ॥ गर्भाधानकरं लिंगं मूत्रयनं बी
जमूत्रयोः ३९ हृदयं चेतनास्थानं मोजसश्चा — यं मतं ॥ शिराधमन्यो नाभिस्थाः सर्वा
व्याप्य स्तथा तनुं ४० पुंजंति चानिशं वायोः संयोगात्सर्वधातुभिः ॥ नाभिस्थः प्राण
पवनः स्पृष्ट्वा हृत्कमलांतरं ४१ कंठाद्बहिर्विनिर्याति पातुं विष्णुपदामृतं ॥ पीत्वा चां
बरपीयूषं पुनरायाति वेगतः ४२ प्राणयन् देहमखिलं । जीवितं जठरानलं ॥ शरी
रप्राणयोरेवं संयोगा — युरुच्यते ४३ कालेन तद्वियोगाच्च पंचत्वं कथ्यते बुधैः ॥
न जंतुः कश्चिदमरः पृथिव्यां जायते क्वचित् ४४ अतो मृत्युरवार्यः स्यात् किंतु रोगा
न्निवारयेत् ॥ याप्यत्वं याति साध्यस्तु याप्यो गच्छत्यसाध्यतां ४५ जीवितं हंत्यसाध्य ८
स्तु नरस्याप्रतिकारिणः ॥ अतो रुग्भ्यस्तनुं रक्षेत् नरः कर्मविपाकवित् ४६ ध

र्मार्थकाममोक्षाणां शरीरं साधनं यतः ॥ धातवस्तन्मला दोषा नाशयंत्यसमास्तनुं ४७
समास्तु स्वास्थ्यहेतवो विज्ञेया बलायोपचयाय च ॥ ॥ इति कालादिकथनं ॥ ॥ जगद्योनै
रनिद्दस्य चिदानंदैकरूपिणः ॥ पुंसोऽस्ति प्रकृतिर्नित्या — — प्रतिच्छायेव भास्वतः ४८ अचेत
नापि चैतन्ययोगेन परमात्मनः ॥ अकरोद्विश्वमखिलं अनित्यं नाटकाकृतिं ४९ प्रकृति
र्विश्वजननी पूर्वं बुद्धिमजीजनत् ॥ इच्छामयीं महद्रूपां अहंकारस्ततो भवेत् ५० त्रि
विधः सोपि संजातो रजः सत्त्वतमोगुणैः ॥ तस्मात्सत्त्वरजोयुक्ता इंद्रियाणि दशाभव
न् ५१ मनश्च जातं तान्याहुः श्रोत्रं त्वक् नयनं तथा ॥ जिह्वा घ्राणं च वाग्घस्तपादोप
स्थगुदानि च ५२ पंचबुद्धींद्रियाण्याहुः संज्ञोक्तानीतराणि च ॥ कर्मेंद्रियाणि पंचैव क
थ्यंते सूक्ष्मबुद्धिभिः ५३ तमः सत्त्वगुणोत्कृष्टादहंकारात्तथाभवत् ॥ तन्मात्रपंचकं
तस्य नामान्युक्तानि सूरिभिः ५४ शब्दतन्मात्रकं स्पर्शतन्मात्रकं रूपतन्मात्रकं ॥ र

सतन्मात्रकं गंधतन्मात्रकं वेत्ति तद्विदः ५५ तन्मात्रपंचकात्तस्मात्संजातं भूतपंचकं ॥
९ व्योमानिलानलजलक्षोणीरूपं च तत्ततं ५६ शब्दस्पर्शश्च रूपं च रसगंधावनुक्रमा
त् ॥ तन्मात्राणां विषयास्ते स्थूलभावमुपागताः ५७ बुद्धींद्रियाणि पंचैव कथिता
स्तत्वदर्शिभिः ॥ प्रधानं प्रकृतिः शक्तिर्नित्या या विकृतिस्तथा ५८ एतानितस्यना
मानि शिवमाश्रित्य या स्थिता ॥ महानहंकृतिः पंच तन्मात्राणि पृथक्पृथक् ५९ प्र
कृति विकृतिश्चैव सप्तैता विबुधा जगुः ॥ दशेंद्रियाणि चित्तं च महाभूतानि पंच च ६०
विकाराः षोडश ज्ञेयाः सर्वव्याप्य जगत्स्थिताः ॥ एवं खलु विंशतिभिस्तत्वैः सत्ववपुर्ग
हे ६१ जीवात्मा नियतो नित्यो वसति स्वोत्सहूतवान् ॥ स देही कथ्यते पापात्पुण्याद् दुःख
सुखादिभिः ६२ व्याप्तो बद्धश्च मनसा कृत्रिमैः कर्मबंधनैः ॥ कामक्रोधौ लोभ ९
मोहौ वहंकारश्च पंचमः ६३ दशेंद्रियाणि बुद्धिश्च तत्वबंधाय देहिनः ॥ आप्तोनि

तमोगुणाधिक्यस्यात् दुष्टिगंधो लवणाद् भवेत् ॥ कफ आमाशये मूर्ध्नि कंठे हृदि च संधिषु २७
तिष्ठन् करोति देहस्य स्थैर्यं सर्वांगपाटवं ॥ क्लेदनः स्नेहनश्चैव रसनश्चावलंबनाः २८ श्लेष्म
कश्चेति नामानि कफस्योक्तान्यनुक्रमात् ॥ स्नायवो बंधनं प्रोक्तं देहे मांसास्थिमेदसां २९ सं
धयश्चांगसंधाना देहे प्राक्ताः कफान्विताः ॥ आधारश्च तथा सारः कायेस्थीनि बुधा विदुः ३०
मर्माणि जीवधारीणि प्रायेण मुनयो जगुः ॥ संधिबंधनकारिण्यो पदोषधातुवराः शिराः
३१ धमन्यो रसवाहिन्यो धमंति पवनं तनौ ॥ मांसपेश्या बलायास्ते रवष्टंभाय देहिनां ॥
३२ प्रसारणाकुंचनयोरंगानां कुंडरा मताः ॥ नासानयनकर्णानां द्वे द्वे रंध्रे प्रकीर्तिते ३३
मेहनापानवक्त्राणामेकैकं रंध्रमुच्यते ॥ दशमं मस्तके प्रोक्तं रंध्राणीति नृणां विदुः ३४
स्त्रीणां त्रीणि धिकानि स्युः स्तनयोर्गर्भवर्त्मन ॥ सूक्ष्मछिद्राणि चान्यानि मतानि त्वक्सिज
तानां ३५ तद्धा मेप्फुफ्फुसे प्लीहा यद्दक्षिणे यकृन्मतं ॥ उदानवायोराधारः फुप्फुसं प्रोच्य
ते बुधैः ३६ रक्तवाहि शिरामूलं प्लीहा स्यात् महर्षिभिः ॥ यत्कृद्रंजकपित्तस्य स्थानं रक्त

वर्त्तत्॥ वलित्रितयमार्गेणायात्यपानेन नोदितं ७१ प्रवाहिणी सर्जनी च ग्राहिके लिव
लित्रयं॥ रसस्तु हृदयं याति समानमारुतेरितः ७२ रंजितः पाचितस्तत्र पित्तेनाया
ति रक्ततां॥ रक्तं सर्वशरीरस्थं जीवस्याधारमुत्तमं ७३ स्निग्धं गुरु चलं स्वादु विदग्धपि
त्तवद्भवेत्॥ पाचितः पित्ततापेन रसाद्या धातवः क्रमात् ७४ शुक्रत्वं याति मासेन तथा
स्त्रीणां रजो भवेत्॥ कामान्मिथुनसंयोगे शुद्धशोणितशुक्रजः ७५ गर्भसंजायते नी
र्याः संजातो बाल उच्यते॥ अधिके रजसा कन्या पुत्रः शुक्राधिके भवेत् ७६ नपुंस
कं समत्वेन यथेच्छा पारमेश्वरी॥ बालस्य प्रथमे मासि देया भेषजरक्तिका ७७ अव
लेहैकतै केव क्षीरक्षौद्रसिताघृतैः॥ वर्धयेत्तावदेकैकां यावद्भवति वत्सरः ७८ य
स्वैव दद्धिवृद्धिः स्यात् यावत्षोडशवत्सराः॥ ततः स्थिरा भवेत्तावत् यावद्वर्षाणि सप्त १०

तिः ७९ ततो बालकवत्मात्रा ह्रासनीया शनैः शनैः॥ मात्रेयं कल्कचूर्णानां कषायाणां
चतुर्गुणा ८० अञ्जनं च तथा लेपः स्नानमभ्यंग कर्म च॥ वमनं प्रतिमर्शश्च जन्मप्रभृ
ति शस्यते ८१ कवलः पंचमाद्वर्षाद्ष्टमान्नस्यकर्म च॥ विरेकः षोडशाद्वर्षात् विंशतेश्चै
व मैथुनं ८२ बाल्यं वृद्धिश्छविर्मेधा त्वक्दृष्टिः शुक्रविक्रमे॥ बुद्धिः कर्मेन्द्रियं चेतो जी
वितं दशतो ह्रसेत् ८३ अल्पकेशः कृशो रूक्षो वाचालश्चलमानसः॥ आकाशचा
री स्वप्नेषु वातप्रकृतिको नरः ८४ अकालेपलितो व्याप्तो धीमान् स्वेदी च रोषणः॥
स्वप्नेषु ज्योतिषां द्रष्टा पित्तप्रकृतिको नरः ८५ गंभीरबुद्धिः स्थूलांगः स्निग्धकेशो महा
बलः॥ स्वप्ने जलाशयालोकी श्लेष्मप्रकृतिको नरः ८६ ज्ञातव्या मिश्रचिह्नैश्च द्वित्रि
दोषोल्वणा नराः॥ तमः कफाभ्यां निद्रा स्यात् मूर्छा पित्ततमोद्भवा ८७ रजः पित्ता
निलैर्भ्रान्तिस्तन्द्रा श्लेष्मानतमोनिलैः॥ ग्लानिरोजः क्षयाद्दुःखाद्जीर्णाच्च श्रमाद्भवे

तू ८८ यक्ष्मामध्ये पनुत्साह स्तदालस्यमुदीर्यते॥ चैतन्यशिथिलत्वाय त्पीत्वे कं
९१ ग्रवामनुदरेत ८९ विदीर्णवदनश्चासोजृंभा सा कथ्यते बुधैः॥ उदानप्राणयोरूर्ध्व
गमनो लक्ष्मेक का श्रयेत् ९० शब्दः संजायते नस्तः क्षुतं क्षुतं तत्कथ्यते बुधैः॥ उदा
नकोपादाहारः स्खलितस्त्वाच्चयद्वयेत् ९१ पवनस्योर्ध्वगमनं तमुद्गारं प्रचक्षते॥
॥ ॥ इति श्रीदामोदरसूनोः शार्ङ्गधरेण विरचितायां आहारपाकोक्तिशणोत्पत्तिकु
मारपोषणोक्ति प्रकृतिलक्षणाख्यान शारीराध्यायं तृतीयं ३ ॥ ॥ स्वप्नेषु नग्नान्
मुंडांश्च रक्तकृष्णांबरावृतान्॥ व्यंगांश्च विकृतान् कृष्णान् सपाशान् सायुधानपि ९२
बध्नतो निघ्नतश्चापि दक्षिणा दिशमाश्रितान्॥ महिषोष्ट्रखरारूढान् स्त्रीपुंसो यस्तु
पश्यति ९३ स स्वस्थो लभते व्याधिं रोगी यात्येव पंचतां॥ अधो याति पतत्युच्चात् जले ९२
गो वा विलीयते ९४ श्वापदैर्न्य ते केपि मत्स्याद्यैर्गिलितो भवेत्॥ यस्य नेत्रे विली

बंधमाप्नोति दारुणानाम् मुच्यते ६४ तद्दुःखयोगकृद्व्याधिरारोग्यं तत्सुखावहं॥
॥ ॥ इति सृष्टिक्रमः॥ ॥ इति श्रीदामोदरसूनोः शार्ङ्गधरेण विरचितायां संहितायां सृष्टि
क्रमशारीरोध्यायः प्रथमः॥ ॥ यात्यामाशयमाहारः पूर्वं प्राणानिलेरितः॥ माधुर्यं फेन
भावं च षड्रसोपि लभेत्स च ६५ अथ पाचकपित्तेन विदग्धश्चाम्लतां व्रजेत्॥ ततः समा
नमरुता ग्रहणीमभिनीयते ६६ ग्रहण्यां पच्यते कोष्ठवह्निना जायते कटुः॥ रसो भ
वति संपक्वादपक्वादामसंभवः ६७ वह्नेर्बलेन माधुर्ये स्निग्धतां याति षड्रसः॥ युक्तादि
धातूनतिवृद्धान् सम्यक् पक्वाममतोपमः ६८ मंदवह्निविदग्धश्च कटुकाम्लो भवेद्र
सः॥ विषभावं व्रजेद्वापि कुर्याद्वा रोगसंकरं ६९ आहारस्य रसः सारः सारहीनो मलद्रवः॥
शिराभिस्तज्जलं नीतं वस्तौ मूत्रत्वमाप्नुयात् ७० तत्किट्टं च मलं ज्ञेयं तिष्ठेत्पक्वाशये

तयोर्व्यंगाः पटवो निर्मला बराः ॥ सुखिनो वृषभारूढाः शुभ्रपुष्पफलैर्युताः ॥
१२ ॥४॥ सजातयः सचेष्टाश्च सजीव दिशि संगताः ॥ भिषजं समये प्राप्ता रोगिणः सु
खहेतवः ५ ॥ इति दूतलक्षणं ॥ ॥ यस्यां प्राणमरुद्वाति सा नाडी—वसंयुता ॥ नि
जप्रकृतिवर्णाभ्यां युक्तः सत्वेन संयुतः ६ चिकित्स्यो भिषजा रोगी वैद्यभक्तो यतें
द्रियः ॥ ॥ इति रोगिलक्षणं ॥ ॥ चिकित्सार्थं रोगिणः कर्तुं गच्छतो भिषजः सुखं ७
॥ ॥ शकुनं ॥ ॥ याचेयं सौम्यशकुनं प्रोक्तं दीप्तं न शोभनं ॥ वैद्याज्ञानाय दूतस्य ग
च्छतो रोगिणः कृते ८ नश्रुभं सौम्यशकुनं प्रदीप्तं च सुखावहं ॥ ॥ इति शकुनलक्ष
णं ॥ ॥ अथ नामप्रकरणं ॥ ॥ करस्यांगुष्ठमूले या धमनी जीवसाक्षिणी ९ तच्चेष्ट
या सुखं दुःखं ज्ञेयं कायस्य पंडितैः ॥ ९ ॥ नाडी धत्ते मरुत्कोपे जलौकासर्पयोर्गतिं ।
कुलिंगकाकमंडूकगतिं पित्तस्य कोपतः १० गजेंद्रस्य च सिंहस्य गतिं च कफकोप
तः ॥ हंसपारावतगतिं धत्ते श्लेष्मप्रकोपतः ११ लावतित्तिरवर्तीकगमनं स १२

न्निपाततः ॥ कदाचिन्मंदगमना कदाचिद्वेगवाहिनी १२ द्विदोषकोपतो ज्ञेया
हंति स्थानविच्युताः ॥ स्थित्वा स्थित्वा चलति या सा स्मृता प्राणनाशनी १३ अतिक्षी
णा च शीता च जीवितं हंत्यसंशयं ॥ ज्वरकोपेन धमनी सोष्णा वेगवती भवेत् १४ का
मात् क्रोधात् भवेद्वेगात् क्षीणा चिंता भयप्लुता ॥ मंदाग्नेः क्षीणधातोश्च नाडी मंद
तरा भवेत् १५ असृक्पूर्णा भवेत्कोष्णा गुर्वी सामा गरीयसी ॥ लघ्वी वहति दीप्ताग्ने
स्तथा वेगवती मता १६ सुखितस्य स्थिरा ज्ञेया तथा बलवती स्मृता ॥ चपला क्षुधि
तस्य स्यात् तृप्तस्य वहति स्थिरा १७ ॥ ॥ इति नाडी परीक्षा ॥ ॥ इति श्रीदामोदरसू
नोः शार्ङ्गधरविरचितायां संहितायां स्वप्नलक्षण नाडी परीक्षाविधिरध्यायश्चतु
र्थः ॥ ॥४॥ ॥ अथ दीपनपाचनादिलक्षणानि पच्यन्नामं वह्निकृद्यच्च दीपनं त
द्यथा मिसि ॥ ॥ पचत्यामं न वह्निं च कुर्याद्यत्तद्धि पाचनं ॥ १८ ॥ नागकेसरवद्विद्धि पा

२४ श्वगंधमुशली शर्कराश्चशतावरी ३७ दुग्धमाश्च भल्लातफलमज्जामलानिच ॥ प्र
वर्त्तकानि कथ्यंते जनकानि स्वरेतसः ३८ प्रवर्त्तनं स्त्रिशुक्रस्य रेचनं बृहतीफलं ॥ गां
गेरुकी वालि बलाबीजमिक्षुरकं तथा ३९ सद्यः शुक्रकरं यस्यात्तच्छष्यं स्याद्यथा य
यः ॥ देहस्थे ल्पाकरं चैषात् ग्रहणं तद्यथा विषं ४० जातीफलं स्तंभनं च शोषणी च
हरीतकी ॥ आग्नेयं जीवितहरं योगवाहि स्मृतं विषं ४१ निजवीर्येण यद्द्रव्यं श्रोतोभ्यो
दोषसंचयं ॥ निरस्यति प्रमाथि स्यात्तद्यथा मरिचं वचा ४२ पैच्छिल्याद्गौरवाद्द्रव्यं
रुध्वा रसवहाः शिराः ॥ धत्तेयद्गौरवं तस्यादभिष्यंदि यथा दधि ४३ इतिश्रीदामो
दरसूनोः शार्ङ्गधरेण विरचितायां संहितायां सूत्रस्थाने दीपनपाचनादिगुणोक्ति
विधिरध्यायः पंचमः ॥ ॥ रोगाणां गणना पूर्वं मुनिभिर्या प्रकीर्त्तिता ॥ मयात्रयो
च्यते सैव तद्भेदा बहवो मताः ४४ पंचविंशतिरुद्दिष्टा ज्वरास्तद्भेद उच्यते ॥ पृथ २४

येत्तेहीपो नि नीचतां व्रजेत् ९५ तैलं स्वरापि वेद्वापि लोहं वा लभते तिलान् ॥ पक्वान्नं
लभते श्वतानि विशेत्कूपं च सागरं ९६ सस्वस्थो लभते रोगं रोगी यात्येव पंचतां ॥ दुः
स्वप्नान्येवमादीनि दृष्ट्वा ब्रूयान्न कस्यचित् ९७ स्नानं कुर्यात्तुषस्यैव दद्याद्धेमं ति
लोहकान् ॥ पठेत्स्तोत्राणि देवानां रात्रौ देवालये वसेत् ९८ कृत्वैवं त्रिदिनं मर्त्यो दु
स्वप्नात्परिमुच्यते ॥ स्वप्नेषु यः सुरान्नृपान् जीवितः स्वहृदो द्विजान् ९९ गोसमिद्धा
ग्नितीर्थानि पश्येत्स सुखमाप्नुयात् ॥ तीर्त्वा कलुषनीराणि जित्वा शत्रुगणानपि ॥
॥ १०० ॥ ॥ २०० ॥ ॥ आरोहेत् सौधगोशैलकरिवाहान् सुखाय भवेत् ॥ शुभ्रपुष्पाणि
सोश्रीमांसमत्स्यान् फलान्यपि १ आप्तारोगी सुखी भूयात्स्वस्थो धनमवाप्नुयात् ।
अगम्यागमनं लेपो विष्टया रुदितं मृतिं २ आममांसाशनं स्वप्ने धनारोग्याप्तये वि
दुः ॥ जलौकाभ्रमरीसर्पो मक्षिका यापि यं दशेत् ३ रोगी सभूयादारोग्यः स्वस्थो ध
नमवाप्नुयात् ॥ ॥ इति रोगीस्वप्नलक्षणानि ॥ ॥ अथ दूतलक्षणं ॥ ॥ दूताः स्वजा

पृथक्पृथक्॥ दंडकालसकं चैकं एवं नाम्य ह्विलंबिका ५४ अर्शांसि षड्विधान्या
१५ हुः वातपित्तकफाश्रिते॥ संन्निपातांश्च संसर्गात्तेषां भेदो द्विधा स्मृतः ५५ सहजो
त्तरजन्माभ्यां तथाशुष्काद्र्भेदतः॥ त्रिचर्मकीलं तु वातात्पित्तात्कफादपि ५६ ए
कविंशति भेदेन क्रमयस्य द्विधा च ते॥ बाह्यास्तथाभ्यंतरास्च स्तेषु यूका बहिश्चराः
॥५७॥ लिख्याश्चांन्नं ते च रास्क कफात्वा हृदयादकाः॥ अंत्रादा उदरावेष्टा खुरवश्च
महाकुहाः ५८ सुगंधा दर्भकुसुमास्तथा रक्ताश्च मातराः॥ सौरसा लोमविध्वंसा
रोमद्वीपा उडुंबराः ५९ केशादाश्च तथैवान्ये सकृज्जाता मकेरुकाः॥ लेलिहाश्च स
कुलाश्च सौसुरादाः ककेलिका ६० तथान्यः कफरक्ताभ्यां संजातस्नायुकः स्मृ
तः॥ व्रणस्थ क्रमयश्चान्ये विषमा बाह्ययोनयः ६१ पांडुरोगास्तु पंचस्युः वातपित्त १५
कफैस्त्रिधा॥ त्रिभिर्द्दोषैर्मृत्काश्च तथैका कामला स्मृता ६२ स्यात्कुंभकामला

चैका तथैव च हलीमकं॥ पित्तंरक्तं त्रिधा प्रोक्तं ऊर्ध्वगं कफसंभवं ६३ अधोगं मा
रुताद्वेयं तद्द्वयेन द्विमार्गगं॥ कासाः पंच समुद्दिष्टास्त्रय स्यु त्रिभिर्मलैः ६४ उरक्ष
ताच्चतुर्थःस्यात्क्षया-तोश्च पंचमः॥ क्षयाः पंचैव विज्ञेया त्रिभिर्द्दोषैस्त्रयश्च ते क्ष
यश्चतुर्थः संन्निपातेन पंचमःस्यादुरःक्षतात्॥ शोषास्तुः षट्प्रकारेणा स्त्रीप्रसंगात्शु
चोद्रणात् ६६ अध्वश्रमाच्च व्यायामाद्व्रणकादपि जायते॥ श्वासाश्च पंच विज्ञेयाः
क्षुद्रस्यात्तमकस्तथा ६७ ऊर्ध्वश्वासो महाश्वासः छिंन्नश्वासश्च पंचमः॥ कथिताः
पंचहिक्कास्तु ताः क्षुद्रान्नजा तथा ६८ गंभीरा यमला चैव महती पंचमी स्मृताः॥ च
त्वारोग्ने विकारास्तु विषमो वातसंभवः ६९ तीक्ष्णा पित्तात्कफान्मंदो भस्मकोवात
पित्तयोः॥ पंचैवारोचका ज्ञेया वातपित्तकफैस्त्रिधा ७० संन्निपातान्मनस्तापाच्छर्द
यः सप्तधा मताः॥ त्रिभिर्दोषैः पृथक्त्वैस्तु क्रमिभिः संन्निपाततः ७१ घृणयास्त्र

तथा स्त्रीणां गर्भाधानाच्च जायते ॥ स्वरभेदाः षडेवस्युः वातपित्तकफैस्त्रयः ७२
१६ मेदसा संनिपातेन क्षयात्षष्ठ प्रकीर्तितः ॥ तृष्णाश्च षड्विधा प्रोक्ता वातपित्तकफाद
पि ७३ त्रिदोषैरुपसर्गेण क्षयाद्धातोश्च षष्ठिका ॥ मूर्छा चतुर्विधा ज्ञेया वातपित्त
कफैः पृथक् ७४ चतुर्थी संनिपातेन तथैकश्च भ्रमः स्मृतः ॥ निद्रा तन्द्रा च संन्यासो ग्ला
निश्चैकैकशः स्मृताः ७५ मदाः सप्त समाख्याता वातपित्तकफैस्त्रयः ॥ त्रिदोषैरस्त्र
जा मद्या द्विषादपि च सप्तमः ७६ मदात्ययश्चतुर्धा स्याद्वातात्पित्तात्कफादपि ॥ त्रिदो
षैरपि विज्ञेय एकः परमदस्तथा ७७ पानाजीर्णं तथैकं च तथैकः पानविभ्रमः ॥ पा
नात्ययस्तथा चैको दाहाः सप्त तथा मताः ७८ रक्तपित्तात्तथा रक्तात्तृष्णाया पित्त
तस्तथा ॥ धातुक्षयान्मर्मघाताद्रक्तपूर्णोदरादपि ७९ उन्मादाः षट् समाख्याता स्त्रि
भिर्दोषैस्त्रयः स्मृताः ॥ संनिपाताद्विषाद्ज्ञेयः षष्ठो दुःखेन चेतसः ८० भूतोन्मादा वि १६

क् दोषास्तथा द्वंद्वभेदेन त्रिविधस्मृतः ४५ एकश्च संनिपातेन तद्भेदा बहवः स्मृ
ताः ॥ प्रायशः संनिपातेन पंचस्युर्विषमज्वराः ४६ संततं सततश्चैव अन्येद्युष्क
स्तृतीयकः ॥ चतुर्थकश्च पंचैते कीर्तिता विषमज्वराः ४७ तथागंतुज्वरोप्येकस्त्र
योदशविधो मतः ॥ अभिचारग्रहावेशशापैरागंतुकस्त्रिधा ४८ श्रमात् खेदात्
क्षताद्दाहात् चतुर्धा घातको ज्वरः ॥ कामाद्भीतेः शुचो रोषाद्विषाद्दोषधगंधतः ४९
अभिषंगज्वराः षट् स्युः एवं ज्वरविनाश्रयः ॥ पृथक् त्रिदोषैः सर्वैश्च शोकादामा
द्भयादपि ५० अतिसारः सप्तधा स्यात् ग्रहणी पंचधा मता ॥ पृथक् दोषैः संनिपाता
त्तथामेन च पंचमी ५१ प्रवाहिका चतुर्धा स्यात् पृथक् दोषैस्तथाश्रमात् ॥ जीर्णं च
त्रिविधं प्रोक्तं विष्टब्धं वायुना मतं ५२ पित्ताद्विदग्धं विज्ञेयं कफेन मतउच्यते ॥ विषा
जीर्णरसादेकं दोषस्यात् अलसं त्रिधा ५३ विषूची त्रिविधा प्रोक्ता दोषैः सा स्यात्

शातिस्फस्तद्देवाद्दानवादपि॥गंधर्वात् किंन्नरात् यक्षात् पितृभ्यो गुरुशापतः ८१
प्रेताद्व ग्रुह्यकाद्वृद्धा सिध्याद्भूतात् पिशाचतः॥ज्वालाधिदेवतायाश्च नागाच्च ब्रह्मराक्ष
सात् ८२ राक्षसादपि कूश्मांडात् कृत्यावेतालयोरपि॥अपस्मारश्चतुर्धास्यात् स
मीरात् पित्ततस्तथा ८३ श्लेष्मणोपितृतीयस्यात् चतुर्थः सन्निपातितः॥चत्वारश्चाम
वाताः स्युर्वातपित्तकफैस्त्रिधा ८४ चतुर्थः संन्निपाताच्च शूलान्यष्टौ बुधाजगुः॥
पृथक् दोषेस्तथाद्वंद्वं भेदेन त्रिविधान्यपि ८५ आमेन सप्तमं प्रोक्तं सन्निपातेन चा
ष्टमं॥परिणामभवं शूलं अष्टधा परिकीर्तितं ८६ मलैर्यैः शूलं सख्यास्यात्तैरेव परि
णामजं॥अन्नद्रवभवं शूलं रजः पित्तभवं तथा ८७ एकैकं गणितं स्कंदैः उदावर्तास्त्र
योदश॥एकश्चान्निग्रहाः प्रोक्तः तृष्णारोधाद्द्वितीयकः ८८ निद्राघातात्तृतीयस्यात्
चतुर्थः श्वासनिग्रहात्॥छर्दिरोधात्पंचमं स्यात् षष्ठः क्षवथुनिग्रहात् ८९ जृंभा

१७ रोधात्सप्तमंस्यात्तृउद्गारग्रहतोष्टमः ॥ नवमस्याद्दश्करोधात्तु दशमः शुक्रधारणात्
॥९०॥ मूत्ररोधान्मलस्यापि रोधाद्वात विनिग्रहात् ॥ उदावर्तास्त्रयश्चैते घोरोपद्रव
कारकः ९१ आनाहो द्विविधाप्रोक्तः एकः पक्वाशयोद्भवः ॥ आमाशयोद्भवश्चान्यो प्रत्या
नाहश्चउच्यते ९२ उरोग्रहस्तथाचैको हृद्रोगाः पंचकीर्तिताः ॥ वातादिभिस्त्रयः प्रोक्ता
श्चतुर्थः संन्निपाततः ९३ पंचमः कृमिसंजातः तथाष्टाउदराणि तु ॥ वातात्पित्तात्क
फाच्चीणि त्रिदोषेभ्योजलादपि ९४ प्लीहक्षतात् रुद्धगुदात् अष्टमंपरिकीर्तितं ॥ गु
ल्माश्चाष्टो समाख्याता वातपित्तकफैस्त्रयः ९५ द्वंद्वभेदास्त्रयः प्रोक्ताः सप्तमः सं
न्निपाततः ॥ रक्तादष्टमकः स्यात्तो मूत्रघातास्त्रयोदशः ९६ वातकुंडलिका पूर्वं वाता
ष्ठीलाततः परा ॥ वातवस्तिस्तृतीयस्यात् मूत्रघातश्चतुर्थकः ९७ पंचमंमूत्रजठरंष १७
ष्ठामूत्रक्षयः स्मृतः ॥ मूत्रोत्संगः सप्तमस्यात्मूत्रग्रंथिस्तथाष्टमः ९८ मूत्रशुक्रंतु

१८ कः शोफरोगा नवस्मृताः ७ दोषैः पृथक् द्वयैः सर्वैः अभिघाताद्विषादपि॥ वृद्ध
यः सप्तगदिता वातात्पित्तात्कफान्मूत्र ८ रक्तेन मेदसा मूत्रादंत्रवृद्धिश्च सप्तमी॥ अंड
वृद्धिस्तथा चैका तथैका गंडमालिका ९ गंडालजी तु चैका स्यात् ग्रंथयो नवधा मताः॥ त्रि
भिर्दोषैस्त्रयो रक्तात् सिराभिमेदसो व्रणात् १० अ— मांसेन नवमः षड्विधं स्यात्तथार्बु
दं॥ वातात्पित्तात्कफाद्रक्तात् मांसादपि च मेदसः ११ श्लीपदं च तथा प्रोक्तः वातात्पित्तात्क
फादपि॥ विद्रधिः षड्विधाः स्यात्तो वातपित्तकफैस्त्रयः १२ रक्तात् क्षतात् त्रिदोषैश्च
व्रणाः पंचदशोदिताः॥ तेषां चतुर्थो भेदः स्यात् आगंतुर्देहजस्तथा १३ शुद्धो दुष्टश्च वि
ज्ञेयस्तत्संख्या कथ्यते बुधैः॥ वातव्रणः पित्तजस्या कफो रक्तेन व्रणः १४ वातपित्त
भवश्चान्ये वातश्लेष्मभवस्तथा॥ तथा पित्तकफाभ्यां च सन्निपातेन चाष्टमः १५ न १८
वमो वातरक्तेन दशमः पित्तरक्ततः॥ श्लेष्मरक्तभवश्चान्यो वातपित्तासृगुद्भवः १६

वातश्लेष्मासृगुत्थं च पित्तश्लेष्मास्रसंभवः॥ संनिपातासृगुद्भूत इति पंचदशव्रणाः॥
॥१७॥ सद्योव्रणास्त्वष्टधा स्यादवकृष्ट विलंबिनौ॥ छिन्नभिन्नप्रचलिता विद्धसन्निपा
तिता॥१८॥ कोष्ठभेदो द्विधा प्रोक्ता छिन्नांत्रो निःसृतांत्रकः॥ अस्थिभंगोऽष्टधा प्रोक्ता भग्न
पृष्टविदारिताः॥१९॥ विवर्तितश्च विश्लिष्टं तिर्यक् क्षिप्तस्त्वधोगतः॥ ऊर्ध्वगः संधिभग्न
श्च वह्निदग्धश्चतुर्विधः॥२०॥ प्लुष्टोतिदग्धो दुर्दग्धः सम्यग्दग्धश्च कीर्तिताः॥ नाड्यः पंच
समाख्याता वातपित्तकफैस्त्रिधा॥२१॥ त्रिदोषैरपि शल्येन तथाष्टौ स्युर्भगंदराः॥ शत
पोनस्कपवनादुष्ट्रग्रीवश्च पित्ततः॥२२॥ परिस्रावी कफात् ज्ञेया ऋजुर्वातकफोद्भवः॥
परिदोषी मरुत्पित्तादर्शोजः कफपित्ततः॥२३॥ आगंतुजातस्यो न्मार्गी शंबूकावर्तस्त्रि
दोषजः॥ मेढ्रे पंचोपदंशाः स्युः वातपित्तकफैस्त्रिधा॥२४॥ संनिपातेन रक्ताच्च मेढ्र
शूकामयास्तथा॥ चतुर्विंशतिराख्याता लिंगार्शो ग्रथितं तथा॥२५॥ निवृत्तमवमंथश्च
मृदितं शतपोनकः॥ अष्ठीलिका सर्षपिका त्वक्पाकश्चावपाटिका॥२६॥ मांसपाक

१९ स्पर्शहानिर्विरुद्धमणिरुत्तकः॥ मांसार्बुदं पुष्करिका संव्यूढपरिकालिजी॥ २७॥ र
क्तार्बुदं विद्रधिश्च कुंभिका तिलकालकः॥ निरुद्धः प्रकसः प्रोक्तः तथैव परिकीर्त्तिका॥
॥ २८॥ कुष्ठान्यष्टादशोक्तानि वातात्कापालिकं भवेत्॥ पित्तेनोदुंबरं प्रोक्तं कफान्मंडल
चर्चिके॥ २९॥ मरुत्पित्तादृक्षिजिह्वं श्लेष्मवाताद्विपादिका॥ तथा सिध्मैककुष्ठं च कटिभं
वालसं तथा॥ ३०॥ कपित्तात्पुनर्दद्रू पामा विस्फोटकं तथा॥ महाकुष्ठं चर्मदलं पुंडरीकं
शतारुकः॥ ३१॥ त्रिदोषैः काकणं ज्ञेयं तथान्यच्चिच संज्ञलं॥ तच्च वातेन पित्तेन श्लेष्म
णा च त्रिधा भवेत्॥ ३२॥ क्षुद्ररोगः षष्टिसंख्यास्तेषां दौ शर्करार्बुदं॥ इंद्रविद्धा पनसि
का चिह्नतां धालजी तथा॥ ३३॥ वराहदंष्ट्रो वल्मीकं कच्छपी तिलकालकः॥ गर्दभीर
कसान्वेकः पवप्रख्या विकारिकाः॥ ३४॥ कदरं मशकश्चैव नीलिका जालगर्दभः॥ इ
ति वल्लीजतुमणी गुदभ्रंशोग्निरोहिणी॥ ३५॥ संन्निरुद्धगुदः कोष्ठः कुनखोनुशयी १९
तथा॥ पद्मिनीकंटकश्चापथ्य मलसो मुखदूषिता॥ ३६॥ वातात्पित्तात्कफाद्वक्तात्

नवमं विड्घातो दशमं स्त्रलं॥ मूत्रसादश्चोष्णवातो वस्तिकुंडलिकास्तथा १९
त्रयोपेते मूत्रघाताः पृथग्घोराः प्रकीर्तिताः॥ मूत्रकृच्छ्राणि वाष्टौ स्युः वातात्पित्तात्क
फात्त्रिधा १००॥ ॥ ३००॥ सन्निपाताच्चतुर्थं स्याच्छुक्रं कृच्छ्रं च पंचमं॥ विट्कृ
च्छ्रं सप्तमाख्यातं घातकृच्छ्रं च सप्तमं १ अष्टमं चाश्मरीकृच्छ्रं चतुर्था चाश्मरी मता॥
वातात्पित्तात्कफाच्छुक्रात् तथा मेहाश्च विंशतिः २ इक्षुमेहः सुरामेहः पिष्टमेह
श्च सांद्रकः॥ शुक्रमेहोदकाख्यौ च लालामेहश्च शीतकः ३ शिकताह्व शनैर्मेहाद
शैते कफसंभवाः॥ मंजिष्ठाख्य हरिद्राख्यौ नीलमेहश्च रक्तकः ४ कृष्णमेह क्षारमेहः ष
डेते पित्तसंभवाः॥ हस्तिमेहो वसामेहो मज्जामेहो मधुप्रभः ५ चत्वारो वातजा मेहा
इति मेहाश्च विंशतिः॥ सोमरोगस्तथान्वेक प्रमेह पिटिका दश ६ चत्वारो वातजा मे
हा इति मेहाश्च विंशतिः॥ विद्रधश्च दशैतास्युः पिडिका मेहसंभवा॥ मेदोषद्दोषस्तथान्वे

इत्युक्तं त्वग्गलक्षणं॥ विस्फोटाः क्षुद्ररोगेषु तेष्टधा परिकीर्त्तिताः॥३७॥ पृथक् दोषै
स्त्रयो द्वंद्वैस्त्रिविधाः सप्तमो सृजः॥ अष्टमः संन्निपातेन क्षुद्ररुक् समसूरिका॥३८॥
चतुर्दशप्रकारेण त्रिभिर्दोषैः स्त्रिधा च सा॥ द्वंद्वजा त्रिविधा प्रोक्ता संन्निपातेन सप्तमी।
॥३९॥ अष्टमी त्वग्गता ज्ञेया रक्तजा नवमी स्मृता॥ दशमी ससंजाता चतुस्रोन्याश्च दु
स्तराः॥४०॥ अस्थिमज्जशुक्रस्था क्षुद्ररोगा इतीरिताः॥ विसर्पो रोगो नवधा वातपि
त्तकफैस्त्रिधा॥४१॥ त्रिधा च द्वंद्वभेदेन सन्निपातेन सप्तमः॥ अष्टमो वह्निदाहेन नव
मः शस्त्राभिघातजः॥४२॥ तथैकः श्लेष्मपित्ताभ्यां तु दर्द्दः परिकीर्त्तितः॥ वातपित्तेन चैक
स्तु शीतपित्ताय मस्मृतः॥४३॥ अम्लपित्तं तथा प्रोक्तं वातेन श्लेष्मणा तथा॥ तृतीयं
श्लेष्मवाताभ्यां वातरक्तं तथाष्टधा॥४४॥ वाताधिक्येन पित्तश्च कफो दोषत्रयेण च॥ रक्ता
धिक्येन दोषाणां द्वंद्वेन त्रिविधः स्मृतः॥४५॥ अशीतिर्वातजा रोगाः कथ्यन्ते मुनिभाषि

२० ताः॥ आक्षेपको हनुस्तंभोरुःस्तंभः शिरोग्रहः॥४६॥ बाह्यायामोंतरायामः पा
र्श्वशूलं कटिग्रहः॥ दंडापतानकः खल्ली जिह्वास्तंभस्तथार्दितः॥४७॥ पक्षघातः क्रो
ष्टुशीर्षं मन्यास्तंभश्च पंगुताः॥ कपापखंजतांतूनी प्रतितूनीति खंजता॥४८॥ पादहर्षो
गृध्रसी च विश्वाची चापबाहुकः॥ अपतानोव्रणायामो वातकंटोपतंत्रकः॥४९॥ अंगभे
दोंगशोषश्च मम्मणत्वं सकल्लता॥ प्रसिप्तता छिलिका च वामनत्वं च कुब्जता॥५०॥ अंग
पीडांगशूलं च संकोचस्तंभरूक्षता॥ अंगभंगोगविभ्रंशो विड्ग्रहो बद्धविट्कता ५१
मूकत्वमपिजृंभास्यादत्युद्गारोंचकूजनं॥ वातप्रवृत्तिस्फुरणं शिराणां पूरणं तथा ५२
कंपः कार्ष्ण्यं श्यावता च प्रलापः क्षिप्रमूत्रता॥ निद्रानाशः स्वेदनाशो दुर्बलत्वं बलक्षयः॥
॥५३॥ अतिप्रवृत्तिः शुक्रस्य कार्श्यं नाशश्च रेतसः॥ अनवस्थितचित्तत्वं काठिन्यं विर २०
सास्यता॥५४॥ शब्दाज्ञता प्रसुप्तिश्च गंधाज्ञत्वं दृशः क्षयः॥ अथ पित्तभवा रोगा

ता॥६४॥अचैतन्यंचगदिताविंशतिश्लेष्मजागदा॥रक्तस्यचदशप्रोक्ताव्याधय
२१ स्तेषुगौरवं॥६५॥रक्तमंडलकारक्तंनेत्रत्वंरक्तमूत्रता॥रक्तष्ठीवनतारक्तापिंडका
नांचदर्शनं॥६६॥तूहंञ्चपूतिगंधत्वंपीडापाकश्चजायते॥वर्त्मःसप्ततिसंख्याता
मुखरोगास्तथोदिता॥६७॥तेष्वोष्ठरोगागणिताएकादशमिताबुधैः॥वातपित्तकफै
स्त्रिधात्रिदोषैरसजातथा॥६८॥क्षतंमांसार्बुदंचैवखंजौष्ठश्चतथार्बुदं॥मेदोर्बु
दंचार्बुदंरोगाएकादशोष्ठजाः॥६९॥दंतरोगादशख्यातादालनःकृमिदंतकः॥
दंतहर्षःकरालश्चदंतशालश्चशर्करा॥७०॥अधिदंतःश्यावदंतोदंतभेदःकपा
लिका॥तथात्रयोदशमितादंतमूलामयास्मृताः॥७१॥शीतादोपकुशौद्वौतुदंतवि
द्रधिपुष्पटौ॥अधिमांसोविदर्भश्चमहाशुषिरसौषिरौ ७२ तेष्वेवगलयःपं
चवातात्पित्तात्कफादपि॥सन्निपातगलश्चान्यारक्तेनाडीचपंचमी॥७३॥तथा २१

श्चत्वारिंशदिहोदितः ॥५५॥ धूमोद्गारो विदाहस्याद् उष्णांगत्वं मतिभ्रमः ॥ कांतिहानिः
कंठशोषो मुखशोषो अल्पशुक्रता ५६ तिक्तास्यताम्लवक्त्रत्वं स्वेदस्रावोंगपाकता ॥
क्लमो हरितवर्णत्वं अतृप्तिः पीतकायता ॥५७॥ रक्तस्रावोंगदरणं लोहगंधस्यता त
था ॥ दौर्गंधिपीतमूत्रत्वं मरतिः पीतविट्—का ॥५८॥ पीतावलोकनं पीतनेत्रता पीत
दंतता ॥ शीतेच्छा पीतनखता तेजोद्वेषोल्पनिद्रता ॥५९॥ कोपश्च गात्रसादश्च भिन्न
विट्कत्वमंधता ॥ उष्णोच्छ्वासत्वमुष्णत्वं मूत्रस्य च मलस्य च ॥ ६०॥ तमसो दर्शनं पीतमं
डलानां च दर्शनं ॥ निःसत्वं चापि पित्तस्य चत्वारिंशद्रुजः स्मृताः ॥ ६१॥ कफस्य विंशतिं
प्रोक्ता रोगास्तत्राति निद्रता ॥ गौरवं मुखमाधुर्यं मुखलेपः प्रसेकता ॥ ६२॥ श्वेताव
लोकनं श्वेतविट्कत्वं श्वेतमूत्रता ॥ श्वेतांगवर्णता शैत्यमुष्णेच्छा तिक्तकामता ॥ ६३॥
मलाधिक्यं च शुक्रस्य बाहुल्यं बहुमूत्रता ॥ आलस्यं मंदबुद्धित्वं तृप्तिः —घर्घरे

२२ कर्णार्शः कर्णहल्लिरा ॥८२॥ वाधिर्यंतड्विकाकंडूः शकुली कृमिकर्णकः ॥कर्ण
नाहप्रतीनाहः इत्यष्टादशकर्णजाः ॥८३॥ कर्णपालीसमुद्भूता रोगाः सप्तद
हो दिताः ॥ उत्पाटुपालीशोषौच विदारी दुःखवर्धनः ॥८४॥ परिपोटश्च लोहीच
पप्पलीचेति संस्मृताः ॥ कर्णमूलामयाः पंच वातात्पित्तात्कफादपि ॥८५॥ संन्नि
पाताज्वरकाञ्च तथा नासाभवा गदाः ॥ अष्टादशैव संख्याताः प्रतिश्याय स्तेष्वपि ॥
॥८६॥ वातात्पित्तात्कफाद्रक्तात्तु संन्निपातेन पंचमः ॥ अपानस्यात्पूतिनाशो नासा
शोषश्च शसुस्रवः ॥८७॥ नासानाहः पूतिरक्तमर्बुदं दुष्टपीनसं ॥ नासाशोषो घ्राण
पाकः पुटवस्त्वाञ्च दीप्तयः ॥८८॥ तथा दश शिरोरोगा वातेनार्धावभेदकः ॥शि
रस्तापश्च वातेन पित्तपीजल्लतीयकः ॥८९॥ चतुर्थः कफजाः षष्ठी रक्तजा सं २२
न्निपातजा ॥ सूर्यावर्तो शिरःपाकात्तु क्रिमिभिः शंखकेन च ॥९०॥ तथा कपाल

जिह्वामयाः षट्स्फुटः वातपित्तकफैस्त्रिधा॥अलसश्चतुर्थःस्यादधिजिह्वाचपं
चमी॥७४॥षष्ठीजिह्वोपजिह्वास्यात्तथाष्टौतालुकागदाः॥अर्बुदंतालुपिटका
कच्छपीतालुसंहतिः॥७५॥गलशुंडीतालुशोषतालुपाकप्रपुटः॥गलरोगा
स्तथाख्यातास्त्वष्टादशमिताबुधैः॥७६॥वातेनरोहिणिकापूर्वाद्वितीयापित्तरोहिणी॥
हि कफरोहिणिकाप्रोक्तात्रिदोषैरपिरोहिणी॥७७॥मेदोरोहिणिकाद्वंद्वोगलौघोगल
विद्रधिः॥स्वरहरस्तुंडकेरीचशतघ्नीतालुकार्बुदं॥७८॥गिलायुर्वलयश्चापिवा
तात्कंठात्कफात्तथा॥मेदोत्कंठस्तथैवस्यादित्यष्टादशकंठजाः॥७९॥मुखांतःसंभ
वारोगाअष्टौख्यातामहर्षिभिः॥मुखपाकोभवेद्वातात्पित्तात्तद्वत्कफादपि॥८०॥
अर्बुदंचेतिमुखजाःखलुःसप्तसिरामयाः॥कर्णरोगासमाख्यातास्त्वष्टादशमिता
बुधैः॥८१॥वातात्पित्तात्कफाद्रक्तात्सन्निपाताच्चविद्रधेः॥शोथोर्बुदंप्रतिकर्णः

२३ र्मोवाधिमांसार्मस्नाय्वर्मोच पिष्टकः॥ शिराजाः पिटकश्चैव कफाद्ग्रंथितकोऽर्जुनः॥
॥१००॥ ५४०० ॥ स्नातीयामाधिमांसः स्याल्लुङ्गतिशुक्लगतागदाः॥ तथा कृष्णसमु
द्भूताः पंचरोगाः प्रकीर्तिताः॥१॥ सिद्धशुक्लं शिरःशुक्लं क्षतःशुक्लं तथांजिका॥ शि
रासंगश्च सर्वेपि प्रोक्ता कृष्णगतागदाः॥२॥ काचं च षड्विधं ज्ञेयं वातात्पित्तात्कफाद
पि॥ संनिपातात्परक्ताच्च षष्ठं संसर्गसंभवं॥३॥ तिमिराणि षडेवस्फः वातपित्त
कफे त्रिधा॥ संसर्गेण च रक्तेन षष्ठं स्यात्संनिपाततः॥४॥ लिंगनाशः सप्तधा स्या
त्तु वातात्पित्तात्कफेन च॥ त्रिदोषैरुपसर्गाच्च रक्तेन स्याच्च सप्तमः॥५॥ अष्टधा दृ
ष्टिरोगाः स्फः स्लेषु पित्तविदग्धकं॥ अम्लपित्तं विदग्धं च लथैवोष्णाविदग्धकं॥६॥
नकुलांध्यं धूमसरांध्यं रात्र्यंध्यं ह्रस्वदृष्टिकं॥ गंभीरदृष्टिरित्येते रोगाः दृष्टिगताः स्मृ
ताः॥७॥ चत्वारश्चाधिमंथास्फ वातपित्तकफैः सजं॥ अन्ये वंर्धा दृश्च सचत्वारो २३

रोगास्युर्नवर्त्ते षूपशीर्षकं ॥ अरुंषका विद्रधिश्च दारुणं पिटकार्बुदं ॥ ९१॥ इंद्रलुप्त
च खलितिं पलितं चेति ते नव ॥ तथा नेत्र भवा ख्याता श्चतुर्नवति चामयाः ॥ ९२॥ तेषु
वर्त्मगदा प्रोक्ताश्चतुर्विंशति संमिताः ॥ कृच्छ्रोन्मीलः पक्ष्मघातः कफोत्क्लिष्टश्च लाहतः ॥
॥ ९३॥ उन्निमेषः कर्दमश्च रक्तोत्क्लिष्टः कुकूणकं ॥ पक्ष्मार्शः पक्ष्मरोगश्च पित्तोत्क्लिष्ट
श्च पोथकी ॥ ९४॥ श्लिष्टवर्त्मा च बहुलं पक्ष्मोत्संगस्तथार्बुदं ॥ कुंभिका सिकतावर्त्म
लगणोंजननामिका ॥ ९५॥ कर्दमश्याववर्त्मा च विसवर्त्मा तथालजी ॥ उत्क्लिष्टवर्मे
तिगदाः प्रोक्ता वर्त्मसमुद्भवाः ॥ ९६॥ नेत्रसंधिसमुद्भूता नवरोगाः प्रकीर्त्तिताः ॥ ज
लश्रावकफाश्रावो रक्तश्रावश्च मार्वणी ॥ ९७॥ पूयः श्रावः कृमिग्रंथिरुपनाहस्तथा
[illegible]लसी ॥ पूयालस इति प्रोक्ता रोगा नयनसंधिजाः ॥ ९८॥ तथा शिरागता रोगा बु
धैः प्रोक्तास्त्रयोदश ॥ शिरोत्पातः शिराहर्षः शिराजालश्च शुक्तिका ॥ ९९॥ शुक्ला

रक्तदोषैस्त्रिभिस्त्रिधा॥८॥सर्वाक्षिरोगाश्चाष्टौ स्युः तेषु वातविपर्ययः॥अन्यतो
तोवातस्तथापाकात्ययः स्मृतः॥९॥शुष्काक्षिपाकश्च तथा शोफोन्को षितएव
च॥हताधिमंथइत्येते रोगाः सर्वाक्षिसंभवाः॥१०॥पुंस्त्वदोषास्तु पंचैव प्रोक्तास्तत्रेर्ष
कः स्मृतः॥आसेक्यश्चैव कुंभीकः सुगंधी षंडसंज्ञकः॥११॥शुक्रदोषास्तथाष्टौ स्युः
वातात्पित्तात्कफेन च॥कुणपश्लेष्मवाताभ्यां पूयाभः श्लेष्मपित्ततः॥१२॥क्षीणं च वा
तपित्ताभ्यां ग्रंथिश्च श्लेष्मपित्ततः॥मलाभः सन्निपाताच्च शुक्रदोषा इतीरिताः॥१३॥
अथ स्त्रीरोगनामानि प्रोच्यंते पूर्वशास्त्रतः॥अष्टावार्तवदोषाः स्युः वातपित्तकफै
स्त्रिधा॥१४॥पूयाभं कुणपं ग्रंथिः क्षीणं मलसमं तथा॥तथा च रक्तप्रदरं चतुर्विध
मुदाहृतं॥१५॥वातपित्तकफैस्त्रेधा चतुर्थं संन्निपाततः॥विंशतिर्योनिरोगाः स्युः
वातपित्तकफादपि॥१६॥संन्निपाताच्च रक्ताच्च लोहितक्षयतस्तथा॥शुष्काव

२४ यामिनी चैव खंडितांतर्मुखी तथा ॥१७॥ सूचीमुखी विप्लुताजा – – घ्नी च परिप्लुता ॥
उपप्लुता प्राक्चरणा महायोनि[illegible]हृता ॥१८॥ कर्णिका चातिचरणा योनिरोगा इती
रिता ॥ चतुर्विधं योनिकंदं [illegible] कफैस्त्रिधा ॥१९॥ चतुर्थी संन्निपातेन तथाष्टौग
र्भजा गदाः ॥ उपविष्टकगर्भः स्यात्तथा नागोदरस्मृतः ॥२०॥ पक्कल्लो मूढगर्भश्च विष्कं
भो मूढगर्भकः ॥ जरायुदोषो गर्भस्य पातश्चाष्टमकः स्मृतः ॥२१॥ पंचैव स्तनरोगा
स्फः वात पित्तात्कफादपि ॥ संन्निपातात्क्षताच्चैव तथा स्तन्योद्भवा गताः ॥२२॥ बा
लरोगेषु कथिताः स्त्रीदोषाश्च त्रयस्मृताः ॥ अदृष्टपुरुषोत्पन्नो सपत्नीविहितस्तथा ॥
॥२३॥ देवाज्जललती यस्क तथा ये सूतिकागदाः ॥ ज्वरादयश्चिकित्सास्ते यथा दोषं
यथाबलं ॥२४॥ द्वात्रिंशति बालरोगास्तेषु क्षीरलसास्त्रयः ॥ वातात्पित्तात्कफाच्चैव २४
दंतोद्भेदश्चतुर्थकः ॥२५॥ दंतघातो दंतशब्दो कालदंतो हिपूतनं ॥ मुखपाको मुख

स्त[illegible]ग्रहपाकोपशीर्षके ॥२६॥ पार्श्वारुणस्तालुकंठो -- विछिन्नंगलिकः ॥ दोब
[illegible]श्वशाः ॥ महचंकुकूणकः ॥२७॥ रोदनंचातिगल्ली स्यात्तूडुलिद्वाविंशतिस्मृ
ताः ॥ तथा बालग्रहाः स्यात्ता द्वादशैव मुनीश्वरैः ॥२८॥ स्कंदग्रहो विशाखःस्यात्स्वग्र
हस्य पित्तग्रहः ॥ नैगमेषग्रहस्तद्वत् शकुनिः शीतपूतना ॥२९॥ मुखमंडिलिकात्तद्वत्
पूतना चांधपूतना ॥ रेवतीचैव संख्याता तथास्याच्छुष्करेवती ॥३०॥ तथा चरणभेदा
स्युर्वातरक्तादिकास्त्रये ॥ द्विचत्वारिंशदुक्तास्ते रोगेष्वेव मुनीश्वरैः ॥३१॥ द्विषष्ठिरो
गभेदास्युः संन्निपाताश्च[illegible]श्चये ॥ तेपि रोगेषु गणिताः पृथक्प्रोक्तानयेक्कवि
तू ॥३२॥ हीनामिथ्यातियोगा[illegible]दैपंचदशोदिताः ॥ पंचकर्मभवा रोगाः तेपि रो
गेषु संज्ञिकाः ॥३३॥ स्नेहस्वे[illegible]वामो गंडूषांजनतर्पणं ॥ अष्टादशैव यापी
डतास्व रोगेषु लक्षिताः ॥३४॥ शीतोपदवएकस्यादेकश्चोष्णोद्भवो मतः ॥ श

२५ ष्योपद्रव एव क[illegible]व क्षाराश्चैकस्मृतस्तथा॥ ३५॥ स्थावरं जंगमं चैव कृत्रिमं च
त्रिधा विषं॥ तेषां च कालकूटाद्यैर्नवधा स्थावरं विषं॥ ३६॥ जंगमं त्रिविधा प्रोक्तं
स च लूता भुजंगमः॥ वृश्चिकामूषकाः कीटाः प्रत्येकं चतुर्विधं॥ ३७॥ दंष्ट्राविषं
नखविषं बालशृंगादि भिस्तथा॥ मूत्रत्वगीषाछुक्रांश्च दृष्टे निश्वासतस्तथा॥ ३८॥
लालायास्पर्शतस्तद्वल्लूतया शंखाविषंमतं॥ कृत्रिमं त्रिविधं प्रोक्तं गरदूषी - वि
दतः॥ ३९॥ सप्तधातु विषज्ञेयं तथा सप्तोपधातुकं॥ तथैवोपविषेप्यष्टौ जातं
सप्तविधं मतं॥ ४०॥ तथा सूरणकंदूश्च शोफोपशल्लातजस्तथा॥ मदश्चतुर्विध
श्चान्य पूगभंगा दकोद्भवैः॥ ४१॥ चतुर्विधोन्योद्वयापांफलत्वङ्मूलपत्रजः॥
इतिप्रसिद्ध्यगदितायेकिलोपद्रवाश्चविः॥ ४२॥ असंख्यातापरे धातुमल
जीवादिसंभवाः॥ ॥ इति श्रीदामोदरसूनोः शार्ङ्गधरेण विरचितायां संहिता २५

यां निदाने रोगगणसंख्याध्यायः षष्ठः ॥ ६ ॥ ॥ इति पूर्वखंडः संपूर्णः ॥ ॥ अ
थातः स्वरसः कल्कः क्वाथश्च हिमफांटकौ ॥ ज्ञेयाः कषायाः पंचैते लघवस्स्युर्यथो
त्तरं ॥ ॥ ४३ ॥ तेषु स्वरसकल्पना ॥ ॥ आहतात्तत्क्षणाकृष्टाद्द्रक्षुण्णात्समु
पद्भवेत् ॥ वस्त्रनिष्पीडितो यश्च स्वरसो रस उच्यते ॥ ४४ ॥ कुडवं चूर्णितं द्रव्यं क्षिप्तं
च द्विगुणे जले ॥ अहोरात्रस्थितं तस्मात् भवेद्वा रस उत्तमः ॥ ४५ ॥ आदाय शुष्कद्रव्यं
वा स्वरसानामसंभवेत् ॥ जलेष्टगुणिते साध्यं पादशिष्टं च गृह्यते ॥ ४६ ॥ स्वरसस्य
गुरुत्वाच्च पलमर्धं प्रयोजयेत् ॥ निशोषितं चाग्निसिद्धं पलमात्रं रसं पिबेत् ॥ ४७ ॥
मधुश्वेतागुडक्षारान् जीरकं लवणं तथा ॥ घृतं तैलं च चूर्णादीन् कोलमात्रान् र
से क्षिपेत् ॥ ४८ ॥ सयथा ॥ ॥ अमृतायस्वरः क्षौद्रः युक्तः सर्वप्रमेहजित् ॥ हरिद्रा
चूर्णयुक्तो वा रसो धात्र्याः समाक्षिकाः ॥ ४९ ॥ वासकः स्वरसः पेयो वस्कनारक्ते पि

त्तजितू॥ ज्वरका[स] क्षयहराः कामलाश्लेष्मपित्तहा॥५०॥ त्रिफलायाः रसक्षौद्रः
२६ युक्तो दार्वीरसोथवा॥ निंबस्याथ गुडूच्या वा पीतो जयति कामलाः॥५१॥ पीतो
मरीचचूर्णेन तुलसीपत्रजो रसः॥ द्रोणपुष्पीरसो वापि निहंति विषमज्वरान्॥५२॥
जंब्वाम्रामलकीनां च पल्लवोत्थो रसो यजेत्॥ मध्वाज्यक्षीरसंयुक्तो रक्तातीसार
मुल्बणं॥५३॥ स्थूलबंधूलिकापत्ररसः पानाद्व्यपोहति॥ सर्वातिसारानू शोना
ककुरजत्वरसोथवा॥५४॥ आर्द्रकः स्वरसः क्षौद्रः युक्तोहृषणवालतुलू॥ श्वा
सकासारुचिं हंति प्रतिश्यायं विपोहति॥५५॥ बीजपूररसः पानात् मधुक्षारयु
तो जयेत्॥ पार्श्वहृद्वस्तिशूलानि कोष्ठवाकं च दारुणं॥५६॥ शतावर्याश्च मधुना २६
पितः शूलहरो रसः॥ निशाचूर्णयुतः कंन्यारसप्लीहापचीहरः॥५७॥ अलंबुषा
याः स्वरस[illegible]पीतोर्धपलमात्रकः॥ अपचीगंडमालानां कामलायाश्च नाशनः ५८

धिशिमुंडरसः कोष्णो मरिचैरवधूलितः॥ नयेसप्त दिनाध्यासान् सूर्यावर्त्त
र्धभेदकौ॥ ५९॥ ब्राह्मीकूश्मांडषड्ग्रंथाशंखिनीस्वरसाः पृथक्॥ मधुकुष्ठयुताः
पीताः सर्वोन्मादापहारिणः॥ ६०॥ कूश्मांडकस्यस्वरसो गुडेन सहयोजितः॥ दुष्टको
द्रवसंजातं मदं पानाद्व्यपोहति॥ ६१॥ खड्गादिछिन्नगात्रस्यतत्कालपूरितोव्रणः॥ गां
गेयकीमूलरसैर्जायतेगतवेदनाः॥ ६२॥ अथपुटपाका॥ ॥पुटपक्वस्यकल्कस्य
स्वरसोगृह्यतेयतः॥ अतस्तुपुटपाकानां युक्तिरत्रोच्यतेयया॥ ६३॥ पुटपाकस्य
मात्रेयं लेपस्यांगारवर्णता॥ लेपंचद्व्यंगुलं स्थूलं कुर्याद्व्यंगुष्ठमात्रकं॥ ६४॥ का
श्मरीवटजंब्वादिपत्रैर्वेष्टनमुत्तमं॥ पलमात्रो रसोग्राह्यः कर्षमात्रंमधुक्षिपे
त्॥ ६५॥ कल्कांश्चूर्णद्रवाधास्तु देयास्वरसवद्बुधैः॥ सयथा॥ ॥तत्कालकृ
ष्ठ कुटजत्वग्वं तंदुलवारिणा॥ ६६॥ दिष्टं ब्लुः पलमितां जंबूपलवविष्टितां॥

२७ सूत्रेण बंधगोधू[illegible]न पिष्टेन परिवेष्टितां ॥ ६७ ॥ लिप्तांच घनपंकेन गोमयेर्वह्नि
नादहेत् ॥ अंगारवर्णत्वमदं दृष्ट्वा च वह्निसमुद्धरेत् ॥ ६८ ॥ ततो रसग्रहीत्वाच शीतं क्षौ
द्रयुतं पिबेत् ॥ जयेत्सर्वानतीसारान् – – स्रुचिरोत्थितान् ॥ ६९ ॥ इति कुटजपुटपा
कः ॥ ॥ कंडितं तंडुलपलं जलेष्टगुणिते क्षिपेत् ॥ भावइत्वा जलं ग्राह्यं देयं सर्वत्र क
र्मसु ॥ ७० ॥ इति तंडुलजलं ॥ ॥ अरलूत्वक् कृतश्चैव पुटपाको ग्निदीपनः ॥ मधुमो
चरसाभ्यां च युक्तं सर्वातिसारनुत् ॥ ७१ ॥ इति अरलूपुटपाकः ॥ ॥ न्यग्रोधादेश्च
कल्केन पूरयेत्तैरतित्तिरः ॥ निरंगमुदरं सम्यक् पुटपाकेन संपचेत् ॥ ७२ ॥ तत्क
ल्कस्य रसः क्षौद्रयुक्तः सर्वातिसारनुत् ॥ इति न्यग्रोधतित्तिरपुटपाकः ॥ ७३ ॥ पु २७
टपाकेन विपचेत् स्रुपक्वं दाडिमीफलं ॥ तद्रसो मधुना युक्तो सर्वातीसारनाशनः ॥
॥ ७४ ॥ इति दाडिमीपुटपाकः ॥ ॥ बीजपूराम्रजंबूनां पल्लवानि जटा पृथक् ॥

लजैः॥विपचेत्पुटपाकेन ~~द्रवस्तुटपाकेन पाचयेत्॥ ८१~~ श्वासः क्षौद्रेण संयुतः॥
२८ ॥८२॥आमवातसमुद्भूतां पीडां जयति दुस्तरां॥ ॥इति द्वितीयशुंठीपुटपाकः॥
सौरणं कंदमादाय पुटपाकेन पाचयेत्॥८३॥सतैललवणस्तस्य रसः श्वासोवि
कासनुत्॥शरावसंपुटे दग्धं शृंगं हरिणजं पिबेत्॥८४॥गव्येन सर्पिषा सद्यो हृ
च्छूलं नश्यति ध्रुवं॥इति मृगशृंगपुटपाकः॥ ॥इति श्रीदामोदरसूनोः शार्ङ्ग
धरेण विरचितायां संहितायां चिकित्सास्थाने स्वरसादिकल्पनाध्यायः सप्तमः
॥ ॥७॥ ॥अथ क्वाथकल्पनामाह॥ ॥पानीयं षोडशगुणं क्षुण्णे द्रव्यपले क्षि
पेत्॥मृत्पात्रे क्वाथयेत् ग्राह्यं अष्टमांशावशेषितं॥८५॥तज्जलं पाययेद्धीमान्
कोष्णं मृद्वग्निसाधितं॥शृतः क्वाथः कषायश्च निर्यूहः सन्निगद्यते॥८६॥आ २८
हारस[...]केन संजाते द्विपलोन्मितं॥ वृद्धवैद्योपदेशेन पिबेत् क्वाथं सुपा

चितं॥८७॥क्वाथे क्षिपेत् सितामंशैः चतुर्थाष्टमषोडशैः॥वातपित्तकफातंके
विपरीतं मधु स्मृतं॥८८॥जीरकं गुग्गुलुं क्षारं लवणं च शिलाजितु॥हिंगु त्रिकटुकं
चैव क्वाथे शाणोन्मितान् क्षिपेत्॥८९॥क्षीरं घृतं गुडं तैलं मूत्रं चान्यद्द्रवं तथा॥पक्कं
चूर्णादिकं क्वाथे निक्षिपेत्कर्षसं— तं॥९०॥सयथा॥गुडूची धान्यकारिष्टपद्म
काररक्तचंदनैः॥गुडूच्यादिगुणः क्वाथः सर्वज्वरहरः स्मृतः॥९१॥दीपनो दाहहृल्ला
सतृष्णाछर्दिरुचिं जयेत्॥इति गुडूच्यादिक्वाथः॥ ॥गुडूची पिप्पलीमूलनागरैः पा
चनं स्मृतं॥तद्यात् वातज्वरे पूर्णलिंगे सप्तमवासरे॥९२॥इति गुडूच्यादिपाचनं वात
ज्वरे॥ ॥शालिपर्णी बला बिल्वधान्यगोक्षुरकं तथा॥आसां क्वाथं पिबेत् सोष्णं तीव्र
वातज्वरच्छिदं॥९३॥ ॥इति शालिपर्ण्यादिक्वाथः॥ ॥कट्फलेंद्रयवापाठातिक्ता
मुस्तैः सतेजल॥पाचनं [illegible] क्रियात् तीव्रपित्तज्वरं नृणां॥९४॥ x काश्मी

× रीसारिवाइक्ष [illegible] जायमाणामलकं स्वः॥ कषायः सगुडपीतो वातज्वरविनाशनः ९३ ×
२९ ॥ ॥इतिकच्छ्लादिपाचनंपित्तज्वरे॥ ॥पर्पटोवासकस्तिक्ताकैरातोधन्वया
सकः॥ प्रियंगुश्चक्षुद्रः क्वाथः एषांशर्करयायुतः॥ ९५॥ पिपासादाहपित्तास्रयु
क्तंपित्तज्वरंजयेत्॥ ॥इतिपर्पटादिक्वाथः॥ ॥द्राक्षाहरीतकीमुस्ताकटुकाकृत
मालकः॥ ९६॥ पर्पटश्चकृतः क्वाथः एषांपित्तज्वरापहः॥ तृष्णामूर्छादाहपित्तास्र
कृशमनोभेदनस्मृतः॥ ९७॥ ॥इतिद्राक्षादिक्वाथः॥ ॥बीजपूरशिफापथ्या
नागरग्रंथिकैःकृतं॥ सक्षारंपाचनंश्लेष्मज्वरेद्वादशवासरे॥ ९८॥ ॥बीज
पूरादिपाचनंश्लेष्मज्वरे॥ ॥भूनिंबनिंबपिप्पल्यः सठीशुंठीशतावरी॥ गुडूची
बृहती [illegible] क्वाथो हन्यात्कफज्वरं॥ ॥१००॥ ॥५००॥ ॥इतिभूनिंबादि २९
कफज्वरे॥ [illegible] लिंत्रिफलातिक्तासठीवासामृतांभवं॥ क्वाथोमधुयुतः पीतोहं

वि[illegible]पुटपाकेन क्षौद्रयुक्तश्च तद्रसः॥ ७५॥ छर्दिन्निवारयेत् घोरां सर्वदोषसमु
द्भवं॥ इतिपल्लवपुटपाकः॥ ॥पिष्टानां वृषपत्राणां पुटपाकरसो हिमः॥ ७६॥ मधु
युक्तोजयेद्रक्तः पित्तकासज्वरान्जयेत्॥ इतिवासापुटपाकः॥ पक्वेसूक्ष्मडांसपक्वां
गोपङ्कपाकेन..द्रसः॥ ७७॥ पिप्पलीचूर्णसंयुक्तः कासश्वासकफापहः॥ इतिक्षुद्रा
कंटकारीपुटपाकः॥ बिभीतकफलंकिंचित् घृतेनाभ्यज्यलेपयेत्॥ गोधूमपिष्टनां
गारैः विपक्वेपुटपाकवत्॥ ७८॥ ततःपक्वं समुद्धृत्य त्वचं तस्यमुखेक्षिपेत्॥ का
सश्वासप्रतिश्यायः स्वरभंगान्जयेत्ततः॥ ७९॥ इतिबिभीतकपुटपाकः॥ चूर्ण
किंचित्घृताभ्यक्तं शुंठ्या एरंडजैर्दलैः॥ वेष्टितंपुटपाकेन विपक्वेन्मंदवह्निना॥
॥ ८०॥ ततः समुद्धृत्य चूर्णं ग्राह्यं प्रातः शिलासमं॥ तेनयांतिसमंपीडाअग्नमाती
सारसंभवा॥ ८१॥ इतिशुंठीपुटपाकः॥ ॥शुंठीकल्कं विनिक्षिप्यरसैरेरंडजै

शालिपर्णी पृश्निपर्णी बृहती द्वय गोक्षुरैः ॥८॥ बिल्वाग्निमंथशोनाकः काश्मरी पा
३० टलायुतैः ॥ दशमूली मिताख्यातं कथितं तज्जलं पिबेत् ॥९॥ पिप्पलीचूर्णसंयुक्तं वा
तश्लेष्महरं परं ॥ संनिपातज्वरहरं सूतिकादोषनाशनं ॥ १०॥ शाखाशैत्यंभ्रमश्वेदः
कासश्वासविपाकहृत् ॥ हृत्कंठग्रहपार्श्वार्तितंद्रामस्तकशूलहृत् ॥ ११॥ ॥इति दश
मूलं संनिपातज्वरे ॥ ॥अभयामुस्तधान्याकं रक्तचंदनपद्मकैः ॥ वासाकेंद्रयवोशी
रगुडूची कृतमालकैः ॥ १२॥ पाठानागरतिक्ताभिः पिप्पलीचूर्णयुक्शृतं ॥ बिबे
त्रिदोषज्वरजित् पिपासादाहकासनुत् ॥१३॥ प्रलापश्वासतंद्राघ्नं दीपनं पाचनं प
व रं ॥ विण्मूत्रानिलविष्टंभ भ्रमीशोषारुचिछिदं ॥१४॥ ॥इति अभयादिसंनिपात
ज्वरे ॥ ॥ किरातकटुकामुस्तधान्येंद्रयवनागरैः ॥ १४॥ दशमूलमहादारुगज ३०
पिप्पलिकायुतैः ॥ कृतः कषायः पार्श्वार्तिसंनिपातज्वरं जयेत् ॥१५॥ कासश्वास

व[illegible] हेरक्वातसंद्राहृद्ग्रहनाशनः ॥ ॥इति अष्टादशांगक्वाथः ॥ ॥ कच्चुलांबुदभा
र्ङ्गी । सेः धान्यारोहिषपर्पटैः ॥१६॥ वचाहरीतकीशृंगोदेवदारुमहौषधैः ॥ क्वाथः क्वा
संज्वरं हंति श्वासश्लेष्मगलग्रहान् ॥ १७॥ ॥इति कच्चलादिः ॥ ॥ क्वाथो जीर्णज्वरा
न् हंति गुडूच्या पिप्पलीयुतः ॥ यथा पर्पटजः क्वाथः पित्तज्वरहरः परः ॥१८॥ नि
दग्धिकामृतासुंठी कषायं पाययेद्भिषक् ॥ पिप्पलीचूर्णसंयुक्तं श्वासकासाग्नि
तापहं ॥१९॥ पीनसारुचिवेश्वथुः शूलजीर्णज्वरछिदं ॥ इति निदग्धिकाचूर्णजी
र्णज्वरे ॥ ॥क्षुद्राधान्यकशुंठी गिरिगुडूची मुस्तपद्मकैः ॥२०॥ रक्तचंदनभूनिंबप
टोलवृषपौष्करैः ॥ कटुकेंद्रयवारिष्टभार्ङ्गीपर्पटकैः समैः ॥२१॥ क्वाथं प्रातर्नि
षेवेत सर्वशीतज्वरछिदं ॥ इति बृहती क्षुद्रादिशीतज्वरे ॥ ॥मुस्ताक्षुद्रामृताशुं
ठीधात्रीक्वाथः समाक्षिकः ॥ २२॥ पिप्पलीचूर्णसंयुक्तो विषमज्वरनाशनः ॥ इ

त्तिमुस्तादि विषमज्वरे॥ ॥पटोलत्रिफलानिंबाडीक्षा शम्याकवासकैः॥२३॥क्वाथः
३१ शितामधुयुतो जयेदैकाहिकज्वरं॥ ॥इतिपटोलादिएकाहिकज्वरे॥ ॥गुडूचीधान्य
मुस्ताभिः चंदनोशीरपद्मकैः॥२४॥कृतं क्वाथं पिबेत्क्षौद्रं शितायुक्तं ज्वरातुरः॥तृ
तीयज्वरनाशाय तृष्णदाह निवारणं॥२५॥इतिगुडूच्यादितृतीयज्वरे॥देवदारु
शिवावासाशालिपर्णिमहौषधैः॥धात्रीयुक्तः सतंशीतंवा श्राम्मधुशितायुतं २६
चातुर्थिकज्वरे वासे कासे मंदानले तथा॥ ॥इतिदेवदार्व्यादिचातुर्थिकज्वरे॥ ॥
गुडूचीधान्य गोशीरशुंठीवालकपर्पटैः॥२७॥बिल्वप्रति विषापाठारक्तचंद
नवत्सकैः॥किरातमुस्तीइयवैः कृतं शिताशिशिरं पिबेत्॥२८॥सक्षौद्रं सरक्तपित्त
घ्नं ज्वरा[illegible]शालं॥इतिबृहद्गुडूच्यादिज्वरातिसारे॥ ॥नागरं कुटजामु ३१
स्ता[illegible]तथा॥२९॥एभिः कृतं पिबेत्क्वाथं ज्वरातीसारनाशनं॥इ

न्य[illegible]कृतज्वरं॥१॥ ॥इतिपटोलादिक्वाथः॥ ॥पर्पटाष्टमृताविश्वाकै
[illegible]लैः[illegible]तंजलं॥पंचलं इमिदं ज्ञेयं वातपित्तज्वरापहं॥२॥ ॥इतिपंचभद्रक्वा
थः॥ ॥कृ[illegible]शुंठीगुडूचीनो कषायः पौष्करस्य च॥कफवाताधिके पेयो ज्वरे वापि
त्रिदोषजे॥३॥कासश्वासारुचिकरे पार्श्वशूलविधायनी॥ ॥इतिलघुक्षुद्रादि
क्वाथः॥ ॥आरग्वधकणामूलं मुस्ततिक्ताभयाकृतः॥४॥क्वाथः क्षमयति क्षिप्रं
ज्वरं वातकफोद्भवं॥इतिआमशूलप्रशमनो ह्येदीदीपनपाचनः॥ ॥इतिरग्वधादि
क्वाथः॥ ॥अमृतारिष्टकटुकामुस्तेंद्रयवनागरैः॥५॥पटोलचंदनाभ्यां च पिप्पलीचू
र्णयुक्तमृतः॥अमृताष्टकमेतच्च पित्तश्लेष्मज्वरापहं॥६॥छर्दिरोचकहृल्लासदा
हतृष्णानिवारणं॥ ॥इतिअमृताष्टकं॥ ॥कंटकारीद्वयंशुंठी धान्यकं सुरदारु च
एभिः कृतं पाचनं स्यात्सर्वज्वरविनाशनं॥ ॥इतिकंटकारीद्वयपाचनं सर्वज्वरेषु॥

सृतं शीतं शिशुभ्यः क्षौद्रसंयुतं ॥ प्रदद्यादवलेहं वा सर्वातीसारशांतये ॥ ३८ ॥ इति
३२ धातक्यादि ॥ ॥ शालिपर्णीबलाबिल्वधान्यःशुंठीकृतः सृतः ॥ आध्मानशूलस
हितं वातजं ग्रहणीं जयेत् ॥ ३९ ॥ ॥ इति शालिपर्ण्यादि ॥ ॥ गुडूच्यातिविषाशुंठीमु
स्तैः क्वाथः कृतो जयेत् ॥ आमानुसक्तां ग्रहणीं ग्राही पाचनदीपनः ॥ ४० ॥ इति चातुर्भ
द्रं ॥ ॥ यवधान्यपटोलानां क्वाथः सक्षौद्रशर्करः ॥ यो[illegible] छर्दतिसारेषु बिल्वाम्रास्थि
भवं तथा ॥ ४१ ॥ त्रिफलादेवदारुभ्यां मुस्तामूषककर्णिका ॥ शीग्रुरेतैः कृतः क्वाथः पि
प्पलीचूर्णसंयुतः ॥ ४२ ॥ विडंगचूर्णयुक्तश्च क्रिमिघ्नः क्रिमिरोगहः ॥ फलत्रिकामृ
तातिक्ता निंबकैरातवासकैः ॥ ४३ ॥ जयेन्मधुयुतः क्वाथः कामला पांडुतां तथा ॥ इति
त्रिफलिकादिक्वाथः ॥ ॥ पुनर्नवाभयानिंबादार्वीतिक्तापटोलकैः ॥ ४४ ॥ गुडूचीनाग
रयुतैः [illegible]शोगो मूत्रसंयुतः ॥ पांडुकासोदरश्वासं शूलं सर्वांगशोफहा ॥ ४५ ॥ इति पु ३२

इतिनागरादिज्वरमतिसारे॥ ॥धान्यबालकबिल्वाब्दनागरैः साधितंजलं॥ ३०॥ आ
मशूलहरंग्राहिदीपनंपाचनंपरं॥ इतिधान्यपंचकं॥ ॥धान्यनागरजः क्वाथः पा
चनोदीपनस्तथा॥ ३१॥ एरंडमूलयुक्तश्चजयेदामानिलंव्यथां॥ ॥इतिधान्यनाग
रं॥ ॥वत्सकातिविषंबिल्वंमुस्ताबालकजः स्रुतं॥ ३२॥ अतीसारंजयेत्सामंविरजंरक्त
शूलहृत्॥ ॥इतिवत्सकादिः॥ ॥कुटजातिविषापाठाधातकीलोध्रमुस्तकैः॥ ३३॥ ह्री
बेरदाडिमैर्युक्तः स्रुतः क्वाथः समाक्षिकः॥ पेयोमोचरसेनैवकुटजाष्टकसंज्ञिकः॥
॥ ३४॥ अतीसारान्जयेद्घोरान्रक्तशूलामुदस्तरान्॥ ॥इतिकुटजाष्टकं॥ ॥ह्रीबेधाता
कीरोध्रपाठालज्जालवत्सकैः॥ ३५॥ धान्यकातिविषामुस्तागुडूचीबिल्वनागरैः॥ कृतः
कषायः शमयेदतीसारंचिरोत्थितं॥ ३६॥ अरोचकामशूलास्रकज्वरघ्नः पाचनस्मृतं॥
॥ ॥इतिह्रीबेरादि॥ ॥धातकीबिल्वरोध्राणिबालकंगजपिप्पली॥ ३७॥ एभिः कृतं

रास्नामृतादारुनागरैरंडजं सृतं॥ ॥सप्तधातुगतेवाते सामे सर्वांगगे पिबेत्॥५४॥
३२ ॥ ॥इतिरास्नापंचकं॥ ॥रास्नागोक्षुरकैरंडः देवदारुपुनर्नवा॥गुडूच्यारग्वधश्चै
व क्काथमेषां विपाचयेत्॥५५॥शुंठीचूर्णेनसंयुक्तं पिबेजंघाकटीग्रहे॥पार्श्वपृष्ठो
रुपीडायामामवाते सुदुस्तरे॥५६॥इतिरास्नासप्तकं॥ ॥रास्नाद्विगुणभागास्यादेक
भागास्ततःपरा॥धन्वयासबलैरंडदेवदारुसठीवचा॥५७॥वासकोनागरंपथ्याल
भमुस्तंपुनर्नवा॥गुडूचीवृद्धदारुश्च शतपुष्पाचवृश्चीव गोक्षुरः॥५८॥अश्वगंधापति
विषाकृतमालशतावरी॥कृष्णासहचरश्चैव धान्यकं बृहतीद्वयं॥५९॥एभिःकृतं
पिबेत्क्काथं शुंठीचूर्णेन संयुतं॥कृष्णाचूर्णेन वा साथ राजगुग्गुलुनाथवा॥६०॥अ
जमोदादिना वा पि तैलमेरंडजेन वा॥सर्वांगकंपे कुब्जत्वे पक्षघाते च बाह्यके॥६१॥ ३२
अंत्रवृद्धौ तथाध्माने जंघाजानुगतेर्दिते॥शुक्रामये मेढ्ररोगे बंध्यायान्यामयेषु च ६२

महारास्नादिराख्यातो ब्रह्मणा गर्भकारणं॥इतिमहारास्नादिक्काथः॥ ॥एरंडबी
जपूरश्च गोक्षुरं बृहतीद्वयं॥६३॥अश्मभेदस्तथा बिल्वं एतन्मूलैः कृतस्ततः॥ ॥
एरंडतैल हिंग्वाढ्यो यवक्षारं ससैंधवं॥६४॥स्तनस्कंधकटीमेढ्रहृदयास्थां व्यथां
जयेत्॥इतिएरंडसप्तकं॥ ॥नागरैरंडयोः क्काथः क्काथं इंद्रजवस्य वा॥६५॥हिं
गुसौवर्चलोपेतेवातशूलकनिवारणः॥त्रिफलारग्वधः क्काथः शर्कराक्षौद्रसंयुतः
॥६६॥रक्तपित्तहरादाहा पित्तशूलनिवारणः॥६७॥एरंडमूलं द्विपलं जले ष्टगु
णिते पिबेत्॥तत्क्काथो यावशूकाढ्यः पार्श्वहृत्कफशूलहा॥६९॥दशमूलकृ
